लक्ष्मीकराम्बुरुहलालनलालसस्य ।
गात्रापवृत्तिभरखर्वितशेषमव्या
दव्याहतं मुरजितः कृतकप्रसुप्तं ॥

३४

मयान्विष्टो धूर्तः स सखि निखिलामेव रजनी
मिह स्यादत्र स्यादिति निपुणमन्यामभिसृतः ।
न दृष्टो भाण्डीरे तटभुवि न गोवर्धनगिरे
र्न कालिन्द्याः [कूले] न च निचुलकुञ्जे पुररिपुः ॥

३५

श्यामीचन्द्रा स्वपिषि न शिशो नैति मामम्ब निद्रा
निद्राहेतोः शृणु सुत कथां कामपूर्वां कुरुष्व ।
रामो नाम क्षि[तिपतिर]भून्माननीयो रघूणा
मित्यूक्तस्य स्मितमवतु वो देवकीनन्दनस्य ॥

*Skm 1 257 (शतानन्दस्य)
*Padyāv 152 (सर्वानन्दस्य)

---

३२ [1] In the MS pādas 3-4 precede 1-2 [2] MS रा [3] MS ने
MS लु

३३ [1] MS च [2] MS °तस्व

३५ [1] MS हि [2] MS त्मो [3] MS पू [4] Padyāv
व्यक्तस्तम्बान्नरहरिरभूद्दानव दारयिष्यन्नित्युक्तस्य स्मितमुदयते°

३६

*Skm I 220 (वाक्पतिराजस्य) Khandap 49 (anon) Daśar ad IV 66 (anon)

खर्वग्रन्थिविमुक्तसंधिविकसद्वक्षःस्फुरत्कौस्तुभं
निर्यन्नाभिसरोजकुड्मलकु (f 13b) [टीगम्भीर] सामध्वनि ।
पात्रावाप्तिसमुत्सुकेन बलिना सानन्दमालोकितं
पायाद्वः क्रमवर्धमानमहिमाश्चर्यं मुरारेर्वपुः ॥

३७

For reff see below

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकवरीभारमंशं वहन्त्याः ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालम्ब्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥

३८

*Skm I 326 (कस्यचित्)

संपूर्णः पुनरभ्युदेति किरणैरिन्दुस्ततो दन्तिनः
कुम्भद्वन्द्वमिदं पुनः सुरतरोरग्रोल्लसन्मञ्जरी ।
इत्थं यद्वदनस्तनद्वयवलद्रोमावलीषु भ्रमः
क्षीराब्धेर्मथनेऽभवद्दिविषदां लक्ष्मीरसावस्तु वः ॥

---

३६ [1] *Khandap* ख [2] MS त्व [3] MS त्को [4] *Skm* ट्टम [5] MS व

३७ *Venīs* prol 6 (some MSS) **Skm* I 339 (वररुचेः) *Sbhv* 79 (भट्टनारायणस्य) *Śp* 135 (निशानारायणस्य) *Sarasvatīk ad* II 38, V 167 (anon.) *Vetālap* (Uhle) p 161 (anon) **S-Ratnak* I 125 (anon.) Hemac pp 176 and 314 (anon) [1] *Venīs* (some MSS) ग्रथिथिल, *Vetālap* (one MS) विलुलित [2] *Venīs*, *Śp*, *Vetālap*, *S.-Ratnak*, *Sarasvatīk* शे Hemac (p 314) °केशमसं [3] *Venīs*, *Sbhv*, *Śp*, *Vetālap*, *Sarasvatīk*, Hemac °लिङ्ग्य, *S-Ratnak*. °रोप्य [4] MS त्मा

३८ [1] MS र्ण [2] MS °र्थेम (cf ver 29b) [3] MS टा (?)

३९

भभभ्रमंति किं मही[2] लललल्वते चन्द्रमाः
कृकृष्ण ववद् द्रुत हहहंसन्ति किं वृष्णयः ।
शिशीध्र मुमुमुञ्च मे ववववक्त्रमित्यादिकं
मदस्खलितमालपन् हलधरः श्रियं वः क्रियात् ॥

पुरुषोत्तमदेवस्य ॥

(Skm I 2.. *S-Ratn ... 109 anon)

४०

किं किं सिंहस्ततः किं नरसदृशवपुर्देव चित्रं गृहीतो[1]
नैवं तत्को ऽत्र जीव द्रुतमुपनय तं नन्वयं प्राप्त एव[2] ।
चापं चापं न खड्गं त्वरिततरमहो[3] कर्कशत्वं नखाना
मित्थं दैत्या[धिनाथं खरनखकुलिशैर्जघ्निवान्यः स वो ऽव्यात् ॥

(*Skm I 200 (श्रीव्यासपादानां) Khandap 34 (28 anon , At p 6, ll 4 sqq anon) Hemac p 96 (anon))

४१

. . . . .] (fol 14a) धेनुदुग्धकलशानादाय गोप्यो गृहं
दुग्धे वष्कयिणीकुले पुनरियं राधा शनैर्यास्यति ।
इत्यन्यव्यपदेशगुप्तहृदयः कुर्वन्विविक्तं[2] व्रजं
देवः कारणनन्दसूनुरशिवं कृष्णः स मुष्णातु वः ॥

---

३९ [1] MS भमि [2] Skm , S -Ratnak मेदिनी [3] MS द्रू [4] MS हृ four times [5] Skm हृ [6] Skm , S -Ratnak पपपपानपात्रस्थितं [7] MS य

४० [1] MS गृहीत्वतो , At धृतः किं [2] Skm नैव धिक्को ऽत्र जीव . . . सो ऽपि संप्राप्त एव , At नैव कस्को ऽत्र जीवो . . . रे देव स . . ., Khandap नैतादृक्को ऽपि . . . मे देव . . . एष Hemac नैवेदृ॰ [3] MS. चि , Skm खड्ग झटिति हहहहा , At खड्गः किमिति हहहहा , Khandap न चापीत्वहहमहा [4] Text given from At , Khandap has ॰दैत्येन्द्रवक्षः खरनखरमुखैर्ज॰ , Skm मित्थेव दैत्यराजं निजनखकुलिशैर्जघ्निवान्सो ऽवताद्वः ॥ Hemac diverges widely in b-d

४१ [1] MS त्वा [2] MS ॰वक्त

४२

*Skm I 296 (सोन्नोकस्य) *Padyāv 262 (साहोकस्य)

सत्रासार्त्ति[1] यशोदया प्रियगुणप्रीतेक्षणं राधया
लग्नै[2]र्बल्लवसूनुभिः सरभसं संभावितात्मो[3]र्जितैः ।
भीतानन्दितविस्मितेन विषमं[4] नन्देन चालोकितः
पायाद्वः करमूर्ध[5]सुस्थितमहाशैलः सलीलो हरिः ॥

सोन्नोकस्यैतौ ॥

४३

*Skm I 201 (दक्षस्य) Śp 4066 (हनुमतः) Khandap 37 (anon)

दंष्ट्रासंकटवक्त्रकन्दरतरज्जिह्वाभृतो हव्यभु[1]
ज्ज्वालाभासुरभूरिकेश[2]रसटाभारस्य दैत्यद्रुहः ।
व्यावल्गद्बलवद्धिरण्यकशिपुं[3]क्रोडस्थलीपाटनं[4]
स्पर्श[5]प्रस्फुटदस्थिपञ्जररवक्रूरा नखाः पान्तु वः ॥

वाकपते. ॥

४४

*Skm I 292

लक्ष्म्याः[1] केशप्रसव[2]रजसां बि[3]न्दुभिः सान्द्रपातै[4]
रुज्जूर्णश्रीर्घ[5]ननिधुवनक्लान्तिनि[6]द्रान्तरेषु ।
दोर्दण्डोऽसौ जयति[जयि]नः शार्ङ्गिणो मन्दराद्रि
ग्रावश्रेणीनिकषमसृणक्षुण्णकेयूरपत्त्रः ॥

श्रीभगीरथस्य ॥

---

४२ [1] *Skm*, *Padyāv* न [2] MS र्स [3] MS त्मौ [4] MS म [5] *Skm*, *Padyāv* पद्म

४३ [1] *Skm* °घर्घरललज्जि°, *Khandap* °जिह्वस्य हव्याशन, *Śp* °द्दललज्जिह्वस्य हव्याशन [2] MS रि [3] MS षु [4] *Khandap*, *Śp* °स्थलास्फालन, *Skm* °पाटल [5] *Khandap* स्फार

४४ [1] MS क्ष्मा [2] *Skm* र [3] MS द्दे (*dt*) [4] MS ते [5] MS °रभ्यर्णशीर्घ [6] MS म

४५

नखक्रकचदारणस्फुटितदैत्यवक्षःस्थल
क्षरत्क्षतजनिर्झरप्रितिविभावितस्वाकृतेः।
हरेरपरकेशरिक्षुभितचेतसः पातु वः
सरोष . . [2]ताधरभ्रुकुटिभङ्गभीमं मुखम् ॥

[illegible] 141 [illegible] = I 72

वाक्पतिराजस्य ॥

४६

वत्स क्ष्माधरगह्वरेषु विचरञ्चारप्रचारे गवां
हिंसान्वीक्ष्य पुरः पुराणपुरुषं नारायणं ध्यास्यसि।
इत्युक्तस्य यशो(f 14b)[दया मुं]ररिपो[र]व्याज्जगन्ति स्फुर
द्बिम्बोष्ठद्वयगाढपीडनवशादव्यक्तभावं स्मितम् ॥

४७

देवो हरिर्जयति यज्ञवराहरूपः
सृष्टिस्थितिप्रलयकारणमेकमेव।
यस्योदरस्थितजगत्त्रयबीजकोश
निर्गच्छदङ्कुरशिखेव विभाति दंष्ट्रा ॥

सोन्नोकस्य ॥

४८

बीजं ब्रह्मैव देवो मधु जलनिधयः कर्णिका स्वर्णशैलः *Shm I 314
कन्दं नागाधिराजो वियदति[वि]पुलं पत्त्रकोषावकाशः। (हलायुधस्य)

---

४५ [1] MS स्वरच [2] Two aksaras lost (वलि ?)

४६ [1] Three aksaras lost, the last partly [2] ढ has here in the MS the later form [3] The conjunct has here in the MS an unusual (later) form

४७ [1] MS भी

४८ [1] MS सि [2] *Shm* न्द्रो [3] *Shm* °दपि विपुलः

द्वीपाः पत्त्राणि मेघा मधुपकुलममूस्ता[1]रका गर्भधूलो
य[2]स्यैतन्नाभिपद्मं भुवनमिति स वः शर्म देवो ददा[3]तु ॥

मालायुधस्य ॥

४९

Sarasvatīk ad iii 36 (anon), and v 138 (anon)
*Sml P 3a
*S-Ratnak vi, 55 (anon)

कनकनिक[1]षस्वच्छे रा[धा]प[2]योधरमण्डले
नवजलधरश्यामामात्मद्युतिं[3] प्रतिबि[4]म्बिताम् ।
असितसिचयप्रान्तभ्रान्त्या[5] मुहुर्मुहुरुत्क्षिप
ञ्जयति जनितव्रीडानम्र[6]प्रि[7]यासहि[8]तो हरिः ॥

वैद्योकस्य ॥

---

४८ [1] Skm °भूत्ता and °मस्ता (B sic) [2] Skm यं
[3] Skm धा

४९ [1] Sarasvatīk, Sml P, S-Ratnak °कलश [2] MS य
[3] MS ते (tim) [4] MS म्ब [5] MS न्त्या ? [6] Sarasvatīk, Sml P °हास: [7] MS °मुः प्रे (pri) [8] Sarasvatīk, Sml P, S-Ratnak °हसि

॥ सूर्यव्रज्या ॥

५०

यस्याधोधस्तथोपर्युपरि निरवधि भ्राम्यतो विश्वमश्वै- | Hemac p 14 (anon)
रावृत्तालातलीलां रचयति रयतो मण्डलं तिग्मधाम्नः ।
सो ऽव्यादुत्तप्तकार्तस्वरसरलशरस्पर्धिभिर्धामदण्डै-
रुद्दण्डैः प्रापयन्वः प्रचुरतमतमःस्तोममस्तं समस्तम् ॥

राजशेखरस्य ॥

५१

शु[क]तुण्डच्छवि सवितुश्चण्डरुचः पुण्डरीकवनबन्धोः । | *Skm 1 8 (विद्यायाः) Śp 86 (नागम्यायाः) *Sūktiratn 12 (anon)
मण्डलमुदितं वन्दे कुण्डलमाखण्डलाशायाः ॥

५२

तुङ्गोदयाद्रिभुजगेन्द्रफणोपलाय | *Skm 1 6
व्योमेन्द्रनीलतरुकाञ्चनप(fol 15a)ल्लवाय ।
संसारसागरसमुत्क्रमियोगिसार्थ-
प्रस्थानपूर्णकलशाय नमः सवित्रे ॥

वराहमिहिरस्य ॥

---

५० [1] Hemac चण्ड [2] MS °रूद्व

५१ [1] MS °तण्ड [2] MS here inserts a danda.

५२ [1] MS म [2] MS वे [3] MS र्थं [4] MS ते

५३

Sūryaśataka 34.

संसक्तं सिक्तमूलादभिनवभुवनोद्यानकौतूहलिन्या[1]
[यामिन्या] कन्ययेवामृतकरकलशावर्जितेनामृतेन ।
अर्कालोकः क्रियाद्वो मुदमुदयशिरश्चक्रवालालवाला
दुद्यन् बालप्रवालप्रतिमरुचिरहःपादपप्राक्प्रवालः[2] ॥

मयूरस्य ॥

---

५३ [1] MS. तु. [2] *Sūryaś.* °रोहः.

॥ वसन्तव्रज्या ॥

५४

आरक्ताङ्कुरदन्तुरा कमलिनी नायामिनी [यामिनी] *Skm II 761
स्तोकोन्मुक्ततुषारमम्बरमणेरीषत्प्रगल्भं महः ।
अप्येते[1] सहकारसौरभमुचो वाचालिताः कोकिलै
रायान्ति [प्रिय]विप्रयुक्तयुवतीमर्मच्छिदो वासराः ॥

सर्वश्रियः ॥

५५

नैवैके वयमेव[1] कोकिलवधूकण्ठोच्चरत्पञ्चम
स्थानोद्बोधितपञ्चमार्गणगुणास्फालेन रोमाञ्चिताः ।
पश्यैते तरवो [ऽपि] सुन्दरि जरत्पत्त्रव्ययानन्तरो
द्भिन्नापाटलकोटिसंपुटदलप्रादुर्भवत्कुड्मलाः ॥

विनयदेवस्य ॥

५६

मलयमहीधरपवनः कलकण्ठकलध्वनिर्निकुञ्जलताः ।
उत्कलिका उत्कलिकाश्चेतसि जनयन्ति लोकस्य ॥

श्रीकण्ठस्य ॥

५७

न प्रहितो नवः प्रियसखीवर्गेण बद्धस्पृह
श्चित्तेनोपहृतः स्मराय न समुत्स्रष्टुं गतः पाणिना ।

---

५४ [1] MS ०प्ये ऽते
५५ [1] MS नैवेके वयत्म [2] MS द्यु
५७ [1] Two aksaras lost, read कान्तेन? [2] MS प

आमृष्टो मुहुरीक्षितो मुहुरभिघ्रातो[1] मुहुर्लोठितः[2]
प्र.....[3] (fol 15b)ःकृतो मृगदृशा किं किं न चूताङ्कुरः[4] ॥

वाकूटस्य ॥

५८

द्विस्त्रिः कोकिलया रुतं विचतुरैश्चूताङ्कुरैरुद्गतं
कोषान् बिभ्रति किंशुका मधुकरश्रेणीजुषः[1] पञ्चषान्[2]।
क्वापि [क्वा]पि महाकुलाकुलतया कान्तापराधग्रह
ग्रन्थिच्छेदसमुद्यतं[3] च हृदयं दोलायते सुभ्रुवाम् ॥

नीलस्य ॥

५९

*Skm II 756
Sarasvatīk ad III 28 (anon)
Kāvyakalpalatā, p 175 (anon)
*Sml P 153a
(वसुकस्य)

जम्बूनां कुसुमोदरेष्वतिरसादाबद्धपानोत्सवाः[1]
कीराः पक्वफलाशया मधुकरीश्चुम्बन्ति[2][3] मुञ्चन्ति च[4] ।
एतेषामपि पश्य किंशुकतरोः पत्रैरभिन्नत्विषां[5]
पुष्पभ्रान्तिभिरापतन्ति[6] सहसा चञ्चूषु भृङ्गाङ्गनाः ॥

राजशेखरस्य ॥

६०

Anargharāghava V 6
*Sml B 190a

दृश्यन्ते मधुमत्तकोकिलवधूनिर्धूतचूताङ्कुर
प्राग्भारप्रसरत्परागसिकतादुर्गास्तटीभूमयः[1] ।

---

५७ [1] MS घा [2] MS धि ? [3] Five aksaras lost in MS [4] MS का

५८ [1] MS यु [2] MS सा [3] MS ते

५९ [1] Sarasvatīk, Sml P °मोत्करे नवमधून्या°, Kāvyakalp °मोद्गमे [2] Skm, Sarasvatīk °रब्ध [3] MS श्च or स्च, Sml P श्चिलन्ति (sic); Kāvyakalp स्विन्वन्ति [4] MS या [5] Sarasvatīk नीलकिंशुकदलैरेभिः समानत्विषां, Sml P जातकि°, Kāvyakalp जातकिंशुकदलश्रेणीसमानत्विषां [6] Kāvyakalp °भ्रान्तिभृतः, Sml P °भृतः पतन्ति मधुपाश्च°

६० [1] MS से (si)

याः कृच्छ्रादभिलङ्घ्य लुब्धकभयात्तैरेव रेणूत्करै
र्धारावाहिभिरस्ति लुप्तपदवीनिःशङ्कमेणीकुलम् ॥

मुरारेः ॥

६१

अशिथिलपरिष्पन्दः कुन्दे तथैव मधुव्रतो
नयनसुहृदो वृक्षाश्चैते न कुड्मलशालिनः ।
दलति कलिका चौती नास्मिंस्तथा मृगचक्षुषा
मथ च हृदये मानग्रन्थिः स्वयं शिथिलायते ॥

६२

कान्तां हित्वा विरहविधुरारम्भखेदालसाङ्गी[1]
मामुल्लङ्घ्य व्रजतु पथिकः को ऽपि यद्यस्ति शक्तिः ।
इत्याशोकी जगति सकले वल्लरी चीरिकेव
प्राप्तारम्भे कुसुमसमये कामदेवेन दत्ता ॥

६३

मन्दं दक्षिणमाह्वय(fol 16a)न्ति पवनं पुंस्कोकिलव्याहृतैः *Ṡkm ii 762 (कस्यचित्)
संस्कुर्वन्ति वनस्थलीः किसलयोत्तंसैर्निषण्णालिभिः ।
चन्द्रं सुन्दरयन्ति मुक्ततुहिनप्रावारया ज्योत्स्नया
वर्धन्ते च विवर्धयन्ति च मुहुस्ते ऽमी स्मरं वासराः ॥

६० [1] *Anangh* (ed *Kāvyamālā*) त्ति
६१ [1] MS नृ [2] MS श्चौ
६२ [1] MS ङ्खी
६३ [1] MS त्त [2] MS ह्नि [3] MS त्स्व

६४

हृद्यस्निग्धैः[1] परभृतरुतैर्मुक्तदीर्घप्रवासः
प्रत्यावृत्तो मधुरिति वदन्दक्षिणो गन्धवाहः ।
शिञ्जल्लोलभ्रमरवलयः[2] काननालीवधूनां
सद्यः कुन्दस्मितबृहतिकाः पूर्णपांचीकरोति[3] ॥

६५

लोलैः कोकिलमण्डलैर्मधुलिहां[1] चंचूर्यमाणैर्गणै
र्नीरन्ध्रैर्गृहवाटिकापरिसरेष्वङ्गारितैः किंशुकैः ।
प्रारब्धे तिमिरे वसन्तसमयक्षोणीपतेर्भ्राम्यतः
प्रस्निग्धा परितो धृतेव कलिकादीपावलिश्चम्पकैः ॥

मनोविदस्यैतौ ॥

६६

Auciтyavicāra carcā ad ɪ 26 (मालवकुवलयस्य)
Vamana ad ɪɪɪ 2 ? (anon)
Hemac pp 134 and 197 (anon)

च्युतसुमनसः[1] कुन्दाः पुष्पोद्गमेष्वलसा[2] द्रुमा[3]
मनसि च गिरं ग्रथ्नन्तीमे[4] किरन्ति न कोकिलाः ।
अथ च सवितुः[5] शीतोल्लासं लुनन्ति मरीचयो
न च जठरतामालम्बन्ते[6] क्लमोदयदायिनीम् ॥

६७

Viddhaś ɪ 25
*Skm ɪɪ 767
Hemac p 134 (anon)

साम्यं संप्रति सेवते विचकिलं[1] षाण्मासिकैर्मौक्तिकै
र्बाह्लीकीदशनव्रणारुणतलैः[2] पत्रैरशोको ऽर्चितः[3] ।

६४ [1] MS ग्धे [2] MS च [3] MS °र्णप्रा
६५ [1] MS हा
६६ [1] MS से: [2] Auc °मैर [3] MS °लिना
[4] Auc, Vām गृह्ण, acc to Vām the original reading was मलयमरुतः सर्पन्तीमे विमुक्तधृतच्छदाः । [5] MS °चित्तः [6] MS च
६७ [1] MS ल [2] Skm °चलैः, corrected to °तरैः, Viddhaś °तरैः [3] Viddhaś °कश्चि

[भृङ्गाल]ङ्घितकोटि किंशुकमिदं किंचिद्विवृन्तायते
माञ्जिष्ठैर्मुकुलैश्च पाटलितरोरन्यैव काचिल्लिपिः ॥

६८

गर्भग्रन्थिषु वीरुधां सुमनसो मध्येङ्कुरं पल्लवा
वाञ्छामा(fol 16b)[त्रपरि]ग्रहः पिकवधूकण्ठोदरे पञ्चमः।
किं च त्रीणि जगन्ति जिष्णु दिवसैर्द्वित्रैर्मनोजन्मनो
देवस्यापि चिरोज्झितं यदि भवेदभ्यासवश्यं धनुः ॥

V Vddhas I 23
*Sām II 751
*Sad B 110a
At p 67
anon
Hemac p 1.4
anon

राजशेखरस्यैतौ ॥

६९

शीतार्त्तैरिव भग्नशैशिरनिशाभागैरहः स्फायते
गर्भं[1] बिभ्रति किंशुका इव दिशां तापाय वह्न्यङ्कुरम्।
किं च स्वाश्रयसंभृतप्रथिमसु च्छायातपाङ्गेष्वयं
लोकः स्तोकरसो ऽद्य न क्वचिदपि स्वच्छन्दमानन्दति॥

त्रैलोचनस्य ॥

७०

उद्भिन्नस्तवकावतंससुभगाः प्रेङ्खन्मरुन्नर्तिताः
पुष्पोद्गीर्णपरागपांशुललसत्पत्त्रप्रकाण्डत्विषः ।
गम्भीरक्रमपञ्चमोन्मदपिकस्थानोच्छलद्गीतयः
प्रत्युज्जीवितमन्मथोत्सव इव क्रीडन्त्यमी भूरुहः ॥

---

६७ [1] *Vrddhas* also °लम्बि, in the MSS लघि can be read [2] *Vrddhas* माञ्जिष्ठै. स्तवकैश्च [3] MS या [4] *Shm* °वृंत्तैव°

६८ [1] *At* छाया [2] MS °स्रा (?) म Hemac and *At* have चिरेप्सितं

६९ [1] MS र्भं

७० [1] MS च [2] MS था

७१

प्रागेव जैत्रमस्त्रं सहकारलता स्मरस्य चापभृतः ।
किं पुनरनल्पनिपतितमधुकरविषकल्कलेपेन ॥

शुभाङ्गस्य ॥

७२

स्वस्ति श्रीमलयाचलात्स्मरसखः श्रीमान्वसन्तानिलः
क्रीडावेश्मसु कामिनः कुशलयत्येतच्च वक्तीतरत् ।
एषो ऽहं मुदितालिकोकिलकुलं कुर्वन्वनं प्राप्तवा
न्युष्माभिः प्रियकामिनीपरिगतैः स्थातव्यमस्मादिति॥

७३

*Skm II 771
(कस्यचित्)

एते नूतनचूतकोरकघनग्रासातिरेकीभव
त्कण्ठध्वानजुषो हरन्ति हृदयं मध्येवनं कोकिलाः ।
येषामक्षिनिभेन भान्ति भगव(fol 17a)द्भूतेशनेत्रानल
ज्वालाजालकरालितासमशराङ्गारस्फुलिङ्गा इमे[5]॥

७४

Śp 3794
(विज्जकायाः)
*Sml P 90b
(,,)
*Sml. B 111a
(,,)
*S-Ratnak
III 352
(anon)

किंशुककलिकान्तर्गतचन्द्रकलास्पर्धि[2] केशरं भाति ।
रक्तनिचोलकपिहितं धनुरिव जतुमुद्रितं वितनोः ॥

वर्धकस्य ॥

---

७१ [1] MS राय

७२ [1] MS र्च

७३ [1] MS नू [2] *Skm* घढ and घ्ढे [3] MS चो [4] MS स [5] *Skm* इव

७४ [1] *Śp*, *S-Ratnak*, *Sml* (*P* and *B*) ॰र्गतमिन्दु [2] MS(?) (*rddhi*) [3] MS र्स

७५

वाप्यो दन्तुरितोदराः कमलिनीपत्त्राङ्कुरग्रन्थिभि
श्चूतानां कलिकामिलन्मधुलिहां क्वापि स्थितिर्वर्तते ।
दौर्भाग्योपनयाय सांप्रतमपांमल्पो ऽपि मार्गश्रमः
शिक्षामुच्छलितुं ददाति रजसां गन्त्रीपथे मारुतः ॥

अभिनन्दस्य ॥

७६

आरक्तैर्नवपल्लवैर्विटपिनो नेत्रोत्सवं तन्वते
तान्धुन्वन्नयमभ्युपैति मधुरामोहो मरुद्दक्षिणः ।
तेनालिङ्गितमात्र एव विधि[ना] प्रादुर्भवन्निर्भर
क्रीडाकूतकषायितेन मनसा लोको ऽयमुन्माद्यति ॥

७७

काप्यन्या मुकुलाधिकारमिलिता लक्ष्मीरशोकद्रुमे
माकन्दः समयोचितेन विधिना धत्ते ऽभिजातं वपुः ।
किं चापाटागिरेरनङ्गविजयप्रस्तावनापण्डितः
स्वैरं सर्पति बालचन्दनलतालीलासखो मारुतः ॥

७८

वह्निर्मन्ये हिमजलमिषात्संश्रितः किंशुकेषु
व्यामं धूमैः स खलु कुरुते काननं कोरकाख्यैः ।

*Skm II 768
(कस्यचित्)

७५ [1] MS या ?
७६ [1] MS वि [2] MS sic (for हो ?) [3] Aksara omitted
७७ [1] MS मे (mi) [2] MS सो [3] The MS has after
a mark of correction Concerning the reading of this
upt passage see the note ad loc [4] MS स्वै
८ [1] Skm ०भया

संतापार्थं कथ[1]मितरथा पान्थ[2]सीमन्तिनीनां
पुष्पव्याजाद्विसृजति शिखाश्रेणिमुद्गाढशोणीम्[3] ॥

यौतायणेः ॥

७९

श्रोण्यां चित्रः कुरुवकगुणः कर्णयोर्मुग्धचूतं
रक्ताशोकं प्रणयि कुचयोर्माधवी मू[र्ध(fol 17b)जे]षु[1] ।
सर्वाङ्गीणो बकुलरजसा पिञ्जरेणोपरागः
स्त्रैणो[2] यूनां भवतु रतये वेशसर्वाभि[3]सारः ॥

सावर्णेः ॥

८०

मुग्धा ताम्रैर्नवकिशलयैः संभृतोदारशोभं
प्रादुर्भूतभ्रमरसरणीयौवनोद्भेदचिह्नम् ।
सीमन्तिन्यः कुसुमधनुषा बद्धसख्यस्य मासः
स्निग्धस्मेरैर्मुखमधिगुणं दृष्टिपातैः पिबन्ति ॥

वागुरस्य ॥

८१

शिलीमुखैरद्य मनोज्ञपक्षै
र्विषोपले[1]पादिव कज्जलाभैः ।
नितान्तपूर्णा मुचकुन्दकोषा
विभान्ति तूणा इव मन्मथस्य ॥

७८ [1] MS क: for कथ [2] These two aksaras are mutilated [3] *Skm* णा and णी

७९ [1] Two aksaras partly lost [2] MS स्त्रे [3] MS ति (?)

८१ [1] MS लो [2] MS र्स

८२

स्नेहं स्रवन्ति तरवः पञ्चापि क्षिपति मार्गणान्मदनः।
परिमुक्तकण्ठरोधः परपुष्टः स्मरति माधुर्यम् ॥

श्रीधर्मकरस्य ॥

८३

संकुचिता इव पूर्वं दुर्गा[1] इव तुषारजनितजडिमानः।
संप्रत्युपरमितहिमे क्रमशो दिवसाः प्रसारजुषः ॥

श्रीधरणीधरस्य ॥

८४

दुःश्लिष्टदुर्लक्ष्यपलाशसंधी
न्यापाटलाग्राणि हरिन्ति मूले[1]।
कुशेशयानां शुकशावभांसि
प्रादुर्बभूवुर्नवकुलङ्मानि ॥

८५

उपनयति कपोले लोलकर्णप्रवाल
क्षणमुकुलनिवेशान्दोलनव्यापृतानाम्।
परिमलितहरिद्रान् संप्रति द्राविडीनां
नवनखपदतिक्तानातपः स्वेदबिन्दून् ॥

योगेश्वरस्य ॥

---

८३ [1] MS र्गाः, followed by a र, which was intended for an otiose mark following the blank square round the hole in the leaf [2] MS ञ्ज

८४ [1] The MS here inserts the sign ꣸ many times

८५ [1] MS भि

८६

सद्यस्तप्तो भ्रमति रजनीं वासवः खण्डयित्वा
क्षीणक्षीणा तदनु भजते सापि सम्यक्प्रसादम् ।
एको . . . .
. . . .

[॥ ग्रीष्मव्रज्या ॥]

८७

. . . .

. . (fol 19a) वर्जितमुग्धवातहरिणश्रेणीपरीतान्तिकाः।
औत्सुक्यं जनयन्ति पान्थपरिषद्धर्माम्बुबिन्दूत्कर
व्याक्षेपक्षममन्दमन्दमरुतो मार्गस्थलीपादपाः ॥

८८

चञ्चच्चञ्चुगणोदरैः शिथिलितप्रायांसमुत्पक्ष्मल
न्यञ्चत्पक्षपुटावकाशम . . त्याश्वोष्मभिर्नीयते।
जङ्घाकुञ्चनलब्धनीडनिविडावष्टम्भकष्टोज्झित
क्षेपीयःपवनाभिघातरभसोत्क्षेपैरहः पक्षिभिः ॥

८९

धास्यत्यद्य सितातपत्रसुभगं सा राजहंसी शिशोः
स्मेराम्भोरुहवासिनोऽपि शिरसि स्नेहेन पक्षद्वयम्।
तृष्णार्त्तः शुकशावकोऽपि सुतनोः पीनस्तनासंगिनीं
मुक्ताहारलतां तदङ्कवसतिस्तोयाशया पास्यति ॥

९०

भुवां घर्मारम्भे पवनचलितं तापहतये
पटच्छत्त्राकारं वहति गगनं धूलिपटलम्।

*Skm II 781
(भवभूतेः)

---

८८ [1] Two aksaras omitted, read °त्याश्वौ ?
९० [1] Skm (A) °च्छाया [2] Skm व (A), र (B)

अमी मन्दाराणां दवदहनसंदेहितधियो
न ढौकन्ते पातुं झटिति मकरन्दं मधुलिहः ॥

९१

*Skm II 792
(कस्यचित्)

अपां कू[1]ले लीनं क्षणपरिचितं चन्दनरसे
मृणालीहारादौ कृतलघुपदं चन्द्रमसि च ।
मु[2]हूर्तं विश्रान्तं सरसकदलीकाननतले[3]
प्रियाकण्ठाश्लेषे निवसति परं[4] शैत्यमधुना ॥

९२

प्रान्तारक्तनिलोचनाञ्चलदरीव्ययाल्पमक्षीभय
प्रोद्भूतोभ[1]यशृङ्गकोटिविग[लद्]वालवल्लीसखैः ।
पाथोबिन्दुभिरस्थिसंधिषु शनैः संसिच्यमानः सुखं
मग्नो वारिणि दूरनिःसहतया निद्रायते सैरिभः ॥

९३

तापं स्तम्बेरमस्य प्रकटयति करः शीकरैः ..(fol 19b) नुद्यन्
पङ्काङ्कं पल्वलानां वहति तटवनं माहिषैः कायकाषैः ।
उत्ताम्यत्तालवश्च प्रतं[2]पति तरणानां[3]शवी तापतन्द्री
मद्रिद्रो[4]णीकुटीरे कुहरि[5]णि हरिणा रात्रयो यापयन्ति ॥

---

९० [1] *Skm* द्र (A), द (B) [2] *Skm* ढौ [3] MS का
[4] MS टे (*ti*)

९१ [1] *Skm* मू [2] MS मू [3] *Skm* ले (A), टे ? (B)
[4] *Skm* निविशति (B निवसति) पद

९२ [1] MS भं

९३ [1] Three aksaras almost entirely lost ? read श्रोणिमु
[2] Corrected from ति [3] MS वा [4] MS द्रा [5] MS रे (*ri*)

९४

• डाः[1] पान्थनखंपचाः प्रचयिनो गन्त्रीपथे पांशवः
कासारोदरशेषमम्बु महिषो मथ्नाति ताम्यन्तिमि ।
†हष्टिर्धावति धातकीवनमसूक्षर्षेण+ तारक्षवी
कण्ठान् बिभ्रति विष्कराः शरशमीनीडेषु नाडींधमान् ॥

वाणस्याभौ ॥

९५

सुभगसलिलावगाहाः पाटलिसंसर्गसुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥

कालिदासस्य ॥

९६

अये तप्तजला नितान्तशिशिरा मूले मुहुर्बाहुभि
र्व्यामथ्योपरतप्रियेषु पथिकैर्मार्गेषु मध्यंदिने ।
आधाराः प्लुतबालशैवलदलच्छेदा[व]कीर्णोर्मयः
पीयन्ते हलमुक्तमग्नमहिषप्रक्षोभपर्याविलाः ॥

योगेश्वरस्य ॥

९७

मृडूयिष्ठतया गुरून् परिहरन्नारण्यकान् गोमयान्
वल्मीकानुपगूहति प्रशिथिलं ज्वालाभिरुडल्वजान् ।
वह्नि†मीत†किलिञ्जसंचयसमुत्सिक्तश्चरन् कानने
प्रस्निग्धानिह विष्किराण्डकललानाज्याशया लुम्पति ॥

तस्यैव ॥

---

९४ [1] Read वाताः ? [2] MS थ्नो [3] Read गृष्टि (or सृष्टि) . . सूक्तर्षेण ?

९६ [1] MS न्ता [2] MS यदि

९७ [1] MS मु or सु ? [2] MS ॰मींड ? For लींढ ?

९८

दूरीभूतशरारि विक्लवबकं .[1] कान्तकारण्डवं
क्लाम्यत्कङ्कमचक्रवाकममिलन्मद्गुप्रपातप्लवम्[2] ।
क्लिष्टं[3]क्रौञ्चमधार्तराष्ट्रमपतत्को[4]यष्टि निष्टीटिभं
सीदत्सारसमप्रसक्तकुरं कालेन जातं (fol 20a)सरः ॥
तस्यैव ॥[5]

९९

*Skm II 787 (मधुरशीलस्य)

तोयोत्तीर्णाः श्रयति कवरीः शेखरः[1] सन्नलानां
शैत्यं सिञ्चत्युपरि कुचयोः पाटलाकण्ठदाम ।
कान्तं कर्णावभिनिविशते कोमलाग्रं शिरीषं
स्त्रीणामङ्गे विभजति तपस्तच[2] तचात्मचिह्नम् ॥
मधुशीलस्य ॥

१००

शुकपक्षहरितकोमलकुसुमसटानां शिरीषयष्टीनाम् ।
तलमाश्रयति दिनातपभयेन परिपिण्डितं शैत्यम् ॥
वागुरस्य ॥

१०१

Vṛddhaś IV 4
*Skm II 794

हरन्ति[1] हृदयानि यच्छ्रवणशीतला वेणवो
यदर्धति[2] करम्बिता शिशिरवारिणा[3] वारुणी ।
भवन्ति च हिमोपमाः स्तनभुवो यदेणीदृशां[4]
शुचेरुपरि[5] संस्थितो रतिपतेः प्रसादो गुरुः ॥

---

९८ [1] One aksara lost, read प्रक्रान्त or निष्क्रान्त ? [2] MS व [3] MS ष्टे [4] MS को [5] The words सर. . . . व are inserted above l 1 of 20a

९९ [1] *Skm* ॰त्तीर्णा . . कवरी शेखर [2] MS य

१०१ [1] Corrected from हार or हरि [2] *Vṛddhaś* र्द्दं and र्चं [3] *Vṛddhaś* also ॰वायुना [4] *Vṛddhaś* also शो [5] *Vṛddhaś* ह

१०२

जलार्द्रा[1] संव्यानं[2] बिसकिसलयैः कैलिवलयाः — *Viddha* IV 3
शिरीषैरुत्तंसो[4] विचकिलमयी हाररचना ।
शुचावेणाक्षीणां मलयजरसार्द्राश्च तनवो
विना तन्त्रं मन्त्रं रतिरमणमृत्युंजयविधिः ॥

१०३

रजनिविरमयामेष्वादिशन्ती रतेच्छां — *Viddhaś* IV 2
किमपि कठिनयन्ती नारिकेली[3]फलाम्भः ।
अपि[4] परिणमयित्री राजरम्भाफलानां
दिनपरिणतिरम्या[5] वर्तते ग्रीष्मलक्ष्मीः ॥

एते राजशेखरस्य ॥

१०४

अम्भोधेर्जलयन्त्रमन्दिरपरिस्पन्दे ऽपि निद्राणयोः — *Skm II 784 (कस्यचित्)
श्रीनारायणयोर्घनं विघटयत्यूष्मा समालिङ्गनम् ।
किं चोत्तप्तविय (fol 20b) त्कपालफलके कङ्कालशेषश्रियं
चन्द्रं मर्मरयन्ति पर्पटमिति क्रूरा रवेरंशवः ॥

नारायणलक्ष्मेः ॥

---

१०२ [1] *Viddhaś* also द्र [2] *Viddhaś* also शुष्माणां
[3] MS कै [4] *Viddhaś* सा [5] MS च [6] MS धा

१०३ [1] *Viddhaś* च [2] MS स [3] *Viddhaś* also नालिकेरी
[4] *Viddhaś* also चि [5] *Viddhaś* °भोग्या and °योग्या
[6] ष्म , the aksara is partly lost

१०४ [1] *Skm* धि [2] MS न्दि [3] MS र्य [4] *Skm* पर्पटवर or वक [5] MS °रङ्श

॥ प्रावृड्व्रज्या ॥

१०५

वानीरप्रसवैर्निकुञ्जसरितामासक्तवासं पयः
पर्यन्तेषु च यूथिकासुमनसामुज्जृम्भितं जा[1]लकैः ।
उन्मीलत्कुटजप्रहासिषु गिरेरालम्ब्य सानूनितः
प्राग्भारेषु शिखण्डिताण्डवविधौ मेघैर्वितानाय्यते ॥

१०६

फलभरपरिणामश्यामजम्बूनिकुञ्ज
स्खलिततनुतरङ्गामुत्तरेण स्र[1]वन्तीम्[2] ।
उपरि विघटमानं[3]प्रौ[4]ढतापिच्छनीलः
श्रयति शिखरमद्रेर्नू[5]तनस्तोयवाहः ॥

१०७

जृम्भाजर्जरडिम्ब[डम्ब]रघनश्रीमत्कदम्बद्रुमाः
शैलाभोगभुवो भवन्ति ककुभः कादम्बिनीश्यामलाः ।
उद्यत्कुन्दलकान्तकेतकभृतः कच्छाः सरिच्छ्रोतसा
माविर्गन्धं[2]शिलीन्ध्रं[3]लोध्रकुसुमस्मेरा वनानां ततिः ॥

---

१०५ [1] MS ज्ञा

१०६ [1] *Mālatīm* स्न [2] MS न्तीः [3] *Mālatīm* °मानः and उपचितघनमाल [4] MS प्रो [5] MS नू

१०७ [1] MS भा [2] *Mālatīm* माविर्भूत, MS मानवि° with न deleted [3] MS न्द्र

१०८

उत्फुल्लार्जुनसर्जवासितवहत्पौरस्त्यझंझामरु
त्प्रेङ्खोलस्खलितेन्द्रनीलशकलस्निग्धाम्बुदश्रेणयः ।
धारासिक्तवसुंधरासुरभयः प्राप्तास्त एते ऽधुना
घर्माम्भोविगमागमव्यतिकरश्रीवाहिनो वासराः ॥

Māl a n ५ ७

भवभूतेरमी ॥

१०९

एणी याति विलोक्य बालशलभान् शष्पाङ्कुरादित्सया
च्छत्त्रीकुड्मलकानि रक्षति चिराद्दण्डभ्रमात्कुक्कुटी ।
धूत्वा धावति कृष्णकीटप(fol 21a)टलश्रेणीं शिखण्डी शिरो
दूरादेव वनान्तरे विषधरग्रासाभिलाषातुरः ॥

११०

आसारान्तमृदुप्रवृत्तमरुतो मेघोपलिप्ताम्बरा
विद्युत्पातमुहूर्तदृष्टककुभः सुप्तेन्दुताराग्रहाः ।
धाराक्लिन्नकदम्बसंभृतसुरामोदोद्वहाः प्रोषितै
र्निःसंपातविसारिदर्दुररवा नीताः कथं रात्रयः ॥

*Skm ii 526 (कस्यचित्)

योगेश्वरस्य ॥

१११

दात्यूहध्वनिभाञ्जि वेतसशिखासुप्तोरगाणि ध्वन
त्कादम्बानि कुरङ्गयूथकलितस्तूपान्युदम्भांसि च ।

*Skm ii 516 (योगेश्वरस्य)

---

१०८ [1] MS र्जे [2] MS यौ [3] *Mālatīm* also झञ्झानिल [4] *Mālatīm* also °वलय [5] *Mālatīm* also त एवाधुना

१०९ [1] MS ता [2] MS °त्रीकुद्म [3] MS ष [4] MS च

११० [1] Corrected from स्वा [2] MS मू [3] *Skm* °सभृत-सुधा, MS सम्भृ° [4] *Skm* also प्तो (A)

१११ [1] MS तु or त्त [2] MS ज्ञ [3] MS °भ्रान्ति

तीराण्यद्य पिपीलिकासमुदयावर्जेज्जटालोलप
व्याप्तान्युन्मदकुक्कुभानि सरितां कुर्वन्ति लोलं मनः ॥

११२

कान्तां क्वापि विलम्बिनीं कलरुतैराहूय [चेत[1]]स्ततो
दिग्भागानवलोक्य रङ्गवसुधामुत्सृज्य पंझां ततः।
एष स्फारमृदङ्गनादमधुरैरम्भोमुचामारवै
र्बर्हि[2][3]श्रेणिकृतातपत्त्र[4]रचनो हृष्टः शिखी नृत्यति ॥

११३

पीताम्भःस्तिमिताः सृजन्ति सलिलान्याबद्धधारं घना
स्तद्धाराध्वनिमीलितानि नयनान्यभ्येति निद्रागमः।
निद्रामुद्रि[1]तलोचने प्रतिगृहं मूकायमाने जने
निर्द्वन्द्वोच्चरदुच्चदर्दुररवैः कोलाहलिन्यो निशाः ॥

११४

धारानि[पात[1]]रवबोधितपञ्जरस्थ
दात्यूहडम्बरकरम्बितकण्ठकूजाः।
अट्टेषु काण्डपटवारितशी[2]करेषु
धन्याः पिबन्ति मुखतामरसं वधूनाम् ॥

११५

शैलश्रेणिरपेतदावदहना द (fol 21b) . . .[2] †टधनं†
जीमूताङ्कुरदन्तुरा दश दिशो भूरेणुमुक्तं नभः।

---

११२ [1] Aksaras omitted [2] MS ष [3] MS ब॰ [4] MS न्त्र?
११३ [1] MS द्रि
११४ [1] Aksaras lost [2] MS सी
११५ [1] MS ॰रयेरत॰ [2] Aksaras lost [3] MS न्त

किं चान्यत्कलिकोर्मिमेदुरमुखी जाता कदम्बच्छवि
श्छिद्यन्ते कियता क्षणेन शिखिनां मौनव्रतग्रन्थयः ॥

११६

केदारे नववारिपूर्णजठरे किंचित्क्वणद्दर्दुरे
शम्बूकाण्डकपिण्डपाण्डरततप्रान्तस्थलीवीरणे ।
डिम्भा दण्डकपाणयः प्रतिदिशं पङ्कच्छटाचर्चिता
श्चुंभूश्चुभूरिति भ्रमन्ति रभसादुद्वायिमत्स्योत्सुकाः ॥

११७

समन्ततोविस्फुरदिन्द्रनील
मणिप्रभाविच्छुरितान्तरालः ।
मर्त्यावतीर्णस्य विडोजसो ऽयं
नीलांशुकच्छत्त्रमिवाम्बुवाहः ॥

११८

खद्योतच्छुरितान्धकारपटलाः स्पष्टस्फुरद्विद्युतः
स्निग्धध्वानविभावितोरुजलदोन्नाहा रटत्कम्बवः ।
एता केतकभेदवासितपुरोवाताः पतद्धारयो
न प्रत्येमि जनस्य यद्विरहिणो यास्यन्ति सोढुं निशाः ॥

*Skm II 827
(कस्यचित्)

११९

एतस्मिन्मदजर्जरैरुपचिते कम्बूरवाडम्बरैः
स्तैमित्यं मनसो दिशत्यनिभृतं धारारवे मूर्छति ।

*Skm II 807
(वातोकस्य)

---

११६ [1] MS व [2] MS द्दि [3] MS ग्र
११७ [1] MS न्त्र
११८ [1] *Skm* ध्वा
११९ [1] *Skm* also °करा (B) [2] *Skm* °धरे

उत्सङ्गे[1] ककुभो विधाय रसितैरम्भोमुचां घोरय
न्मन्ये मुद्रित[3]चन्द्रसूर्यनयनं व्योमापि निद्रायते ॥

१२०

गम्भीराम्भोधराणामविरणनिपतद्वारिधारानिनादा
नीषन्निद्रालसाक्षा दृढगृहपटलाल्लब्धकुष्माण्डवल्श्याः[1]।
दोर्भ्यामालिङ्ग्यमाना जलधरसमये पत्त्वषण्डे निशायां
धन्याः शृण्वन्ति सुप्ताः स्तनयुगभरितोर . . . . . . ॥

१२१

. . . .

. . . .

. . . (fol 23*a*) वोदये ऽद्य जलदव्यालो[ल]पुच्छच्छद
च्छत्त्व[1]च्छादितमौलयो[2] दिशि दिशि क्रीडालसाः केकिनः ॥

१२२

गायति हि नीलकण्ठो नृत्यति[1] गौरी तडित्तरलतारा ।
आस्फालयति मृदङ्गं तदनु घनो ऽयं महाकालः ॥

१२३

अलकेषु चूर्णभासः स्वेदलवाभान् कपोलफलकेषु ।
नवघनकौतुकिनीनां वारिकणान् पश्यति कृतार्थः ॥

---

११९ [1] *Shm* also (A) तत्संगे, MS °ङ्के [2] *Shm* नि
[3] MS has मुद्रियते
१२० [1] *Sic* MS (or श्यः ?)
१२१ [1] MS न्त्व ? [2] MS न
१२२ [1] MS ते (*ti*)

१२४

काले वारिधराणामपतितया नैव शक्यते स्थातुम् ।
उत्कण्ठितासि तरले न हि न हि सखि पिच्छिलः पन्थाः ॥

Sāhityad p 288 (anon)

१२५

असितभुजगशिशुवेष्टितमभिनवमाभाति केतकीकुसुमम् ।
आयसवलयालंकृतविषाणमिव दन्तिनः पतितम् ॥

१२६

स्तम्बेषु केत[2]कीनां यथोत्तरं वामनै[3]र्दलैरद्य ।
विदल[4]न्ति मेषत[5]र्णक[क]च्छच्छविकेशराः सूच्यः ॥

१२७

धूलीभिः केतकीनां परिमलनसमुद्धूलिताङ्गः समन्ता
दन्तोड्डेलद्वलाकावलिकुणपशिरोन[1]द्धनीलाभ्रकेशः ।
प्रेङ्खद्विद्युत्पताकावलिरुचिरधनुःखण्डखट्वाङ्गधारी
संप्राप्तः प्रोषितस्त्रीप्रतिभयज[2]नकः कालकापालिको ऽयम् ॥

१२८

मेघश्यामदिशि प्रवृत्तधनुषि क्रीडत्तडित्तेजसि
च्छन्नाहर्निशि गर्जितप्रमनसि प्रम्लानलीलाकपि ।
पूर्णस्रोतसि शान्तचातकतृषि व्यामुग्धचन्द्रत्विषि
प्राणान् पान्थ कथं दधासि निवसन्नेतादृशि प्रावृषि ॥

---

१२६ [1] MS सु [2] MS ल [3] MS ने [4] MS न [5] MS भ ?

१२७ [1] MS म [2] This aksara is partly effaced

१२९

For riff see below

क्षपां[1] क्षामीकृत्य प्रसभमपहृत्याम्बु सरितां
प्रताप्योर्वीं[3] सर्वां वनगहनमुच्छाद्य[4] (fol 23b) सकलम् ।
क्व संप्रत्युष्णांशुर्गत इति समन्वेषणपरा[5]
स्तडिद्दीपालोकैर्दि[6]शि दिशि चरन्तीव[7] जलदाः ॥

१३०

*Skm II 830 (कस्यापि)

विद्युद्दीधितिभेदभीषणतमःस्तोमान्तराः संतत
श्यामाम्भोधररोधसंकटवियद्विप्रोषितज्योतिषः ।
खद्योतानुमितोपकण्ठतरवः पुष्णन्ति गम्भीरता
मासारोदकमत्तकीटपटलीक्वाणोत्तरा रात्रयः ॥

अभिनन्दस्य ॥

१३१

हर्षोल्ला[1]सितचारुचन्द्रकबृहद्बर्हैर्व[2]नानाममी
जाताः पुष्पितबालशाखिन इवाभोगा भुजङ्गाशिभिः ।

---

१२९ *Skm II 812 (श्रीकण्ठस्य) Sbhv 1765 (पाणिनेः) Śp 3869 (पाणिनेः) *Sml B 119b (पाणिने) *Sabhyāl VI 24b (पाणिनेः) Padyaracanā XI 35 (पाणिनेः) *S-Ratnak III 55 (anon) [1] Sbhv, Śp ॰पाः [2] MS रे (rr) [3] MS प्यो [4] Sbhv, Śp, Sabhyāl, Padyarac छत्वा तरु-गहनमुच्छोष्य, S-Ratnak ॰मुच्छुष्य (!), Skm सर्वा . . . मुत्साद्य [5] Sbhv समालोकन, Śp, Sabhyāl, S-Ratnak, Padyarac तदन्विषण [6] Sbhv, Śp ॰का दि [7] MS न्तो, Sbhv, Śp चरन्तीह, Skm तरन्तीव and चरन्तीव, Sabhyāl चलन्तीव

१३० [1] MS वोधय, Skm ॰वाधस [2] Skm ॰तोन्न [3] Skm also न (B)

१३१ [1] MS र्ला [2] MS है

स्पृष्टाः कोटरनिर्गतार्धतनुभिः पातुं पयोदानिलं
निर्यद्वंशकरीरकोटय इव क्षोणीभृतो भोगिभिः ॥

शतानन्दस्य ॥

१३२

*Skm II 817 (परमेश्वरस्य)

एताः पङ्किलकूलरूढनलदस्तम्ब[1]क्कणत्कम्बवः[2]
क्रीडत्कर्कटचक्रवालविचलज्[3]ज्जम्बालतोयाविलाः[4] ।
हृल्लेखं जनयन्त्यनूपसरितामुत्तुण्डगण्डूपदो
त्कीर्णक्लिन्नमृदो[5] नदर्थ्यपुटितप्रान्तास्तटीभूमयः[6][7] ॥

योगेश्वरस्य ॥

१३३

नवे धारासारे[1] प्रमदचटुलायाः स्थलजुषो
वराटीशुभ्रायाः शफरसरणेरेभिरुपरि ।
कुलीरैर्भ्राम्यद्भि[2]र्गणयितुमिव व्यापृतकरा
मनः क्रीणन्तीव[3] प्रकटविभवाः पल्वलभुवः ॥

अभिषेकस्य ॥

१३४

विन्ध्याद्रि[1]महालिङ्गं स्नपयति[2] पर्जन्यधार्मिकः शुचिभिः ।
जलदेन्द्रनीलगण्डूषै[3]तोर्जितैः[4] संप्रति पयोभिः ॥

---

१३२ [1] *Skm* म्बाः [2] MS क्व or च [3] *Skm* °विलस [4] MS रे [5] *Skm* त्कीर्णोज्झीर्ण [6] *Skm* °दर्बुदस्थ [7] MS टा

१३३ [1] MS चा [2] MS र्भा [3] MS च

१३४ [1] MS °म्ध्याद्रि [2] MS स्न [3] MS ष्ट [4] MS ज्झि

[॥ मदनव्रज्या ॥]

१३५

. . . .

. . . .

(fol 31a) . . . . . .

. राः प्रीतिरती इति क्व महिमा कामस्य नालौकिकः ॥

मनोविदस्याम् ॥

१३६

Vṛddhaś I 1
**Skm* I 469
Śp 3077 (anon)
**Sml B* 7b
**Sabhyāl* I 12 (anon)

कुलगुरुरमराणां[1] केलिदीक्षाप्रदाने[2]
परमसुहृदनङ्गो रोहिणीवल्लभस्य ।
अपि कुसुमपृ[3]षत्कैर्दे[4][वदेवस्य] जेता
जयति सुरत[5]लीलानाटिकासूत्रधारः ॥

राजशे[6]खरस्य ॥

१३७

**Skm* I 466

वन्दे देवमनङ्गमेव रमणीनेत्रोत्पलच्छद्मना
पाशेनायति[2]शालिना सुनिविडं संय[म्य लोकत्र]यम् ।
येनासावपि भस्मला[3]ञ्छिततनुर्देवः कपाली बलात्
प्रेमक्रुद्धनगात्मजाङ्घ्रि[4]विनतिक्रीडाव्रते दीक्षितः ॥

ललितोकस्य ॥

---

१३६ [1] *Skm*, *Śp*, *Sml B*, *Sabhyāl*, *Vṛddhaś* °रबलानां [2] *Śp* °प्रबन्धे [3] MS पू [4] MS त्के [5] *Sabhyāl* मदन [6] MS से

१३७ [1] MS द्मा corrected to द्म [2] MS त [3] *Skm* ला [4] MS °आङ्घ्रि

१३८

स जयति सं[1][कल्पभवो रति]मु[2]खशतपत्त्रचुम्बनभ्रमरः।
यस्यानुरक्तललनानयनान्तविलोकितं[3] वसतिः[4] ॥

दामोदरगु[5]प्तस्य ॥

Kuttanimata v 1
Cf Vetālap xxiv (p 202 of Uhle's ed)

१३९

अहो धनुषि नैपुण्यं मन्मथस्य . . . .[1]।
[शरी]रमक्षतं कृत्वा भिनत्त्य[2]न्तर्गतं मनः ॥

१४०

धनुर्माला मौर्वी क्व[1]णदलिकुलं लक्ष्यमबला
मनो भेद्यं शब्दप्रभृतयः इमे पञ्च विशिखाः।
[2]इया[ञ्जेतुं य]स्य त्रिभुवन[मदेहस्य विभवः
स वः कामः कामान्दिशतु दयितापाङ्गवसतिः ॥]

*Skm I 470 (कस्यचित्)
Sbhv 82 (घण्टकस्य)
*Subhās II (10a) (anon)
Hemac p 16 (anon)

---

१३८ [1] MS स [2] MS सु [3] *Kutt* °न्तविलोकनं, MS विलोकिलोकित [4] MS ते (*ti*) [5] स्य is here erased in the MS

१३९ [1] Read जयैषिणः or सुधन्विनः ? [2] MS त्त्य

१४० [1] *Skm* च [2] Reading of *c-d*, as in *Skm* So also *Sbhv* and *Subhās* (with, however, स कामः कामान्वो) and Hemac (इयज्जे°) The MS passes, *viâ* reminiscence or homœoteleuton, from इया . . . . स्य to ll *c-d* of the verse

[जयति स मदलेखोच्छृङ्खलप्रेमवामा
ललितसुरतलीलादैवत पुष्पचापः।]
त्रिभुवनजयसिद्धौ यस्य शृङ्गारमूर्त्ते
रुपकरणमपूर्वं माल्यमिन्दुर्मधूनि ॥

उत्पलराजस्य ॥

*Skm I 463

१४१

*Skm. I. 465 (वल्लनस्य).

याच्यो न कश्चन गुरुः प्रतिमा च कान्ता
पूजा विलोकनविगूहनचुम्बनानि ।
आत्मा (fol. 31b) निवेद्यमितरव्रतसारजेत्री
वन्दामहे मकरकेतनदेवदीक्षाम् ॥

वल्लणस्य ॥

---

१४१ [1] *Skm.* नि. [2] MS. गु. [3] *Sic* (for जै ?).

॥ वयःसंधिव्रज्या ॥

१४२

भ्रुवोः काचिल्लीला परिणतिरपूर्वा नयनयोः
स्तनाभोगो ऽव्यक्तस्तरुणिमसमारम्भसमये ।
इदानीं बालायाः किममृतमयः किं मधुमयः
किमानन्दः साक्षाद्ध्वनति मधुरः पञ्चमकलः ॥

Shm II 7 (राजोकस्य) Śp 3274 (कस्यापि)

वीर्यमित्रस्य ॥

१४३

उत्तालाः[लकभ]ञ्जनानि कवरीपाशेषु शिक्षारसो
दन्तानां परिकर्म नीविनहनं भ्रूलास्ययोग्याग्रहः ।
तिर्यग्लोचनचेष्टितानि वचसि च्छेकोक्तिसंक्रान्तयः
स्त्री[णां स्नायति शै]शवे प्रतिकलं को ऽप्येष केलिक्रमः॥

Viddhaś II 5
Bālar III 23

१४४

विधत्ते सोल्लेखं कतरदिह नाङ्गं तरुणिमा
तथापि प्रागल्भ्यं किमपि चतुरं लोचनयुगे ।
यदाद[त्ते दृश्यादखि]लमपि भावव्यतिकरं
मनोवृत्तिं द्रष्टुः प्रथयति च दृश्यं प्रति जनम् ॥

Viddhaś II (after) 13, III (after) 21, IV 8

एतौ राजशेखरस्य ॥

---

१४२ [1] *Shm*, *Śp* °गो व्य [2] MS कि [3] *Shm* इदानीमेतस्याः कुवलयदृशः प्रत्यहमय नितम्बस्याभोगो नयति मणिकाञ्चीमधिकतां ॥ *Śp* as our MS, with किं विषमयः (*c*) and पञ्चमरवः (*d*)

१४३ [1] MS न्ना [2] Aksaras lost [3] *Bālar* °वर्ति [4] *Bālar* सा [5] Aksaras lost [6] MS ते (*ti*) [7] *Bālar* प

१४४ [1] MS ध (?) [2] Aksaras lost [3] MS ष्ट., *Viddhaś.* मनोवृत्तिर्द्रष्टु मुखरयति

१४५

एतद्दधाति[1] नवयौवननर्तकस्य
कश्मीरजच्छुरित[2]तालकयुग्म . . ।
. .[3] समुच्छ्वसितवृत्ति मनागुपान्ते
लब्धात्मसीम कुचकु[4]म्भलयुग्ममस्याः ॥

१४६

यौवननगरारम्भे रामाहृदयस्थलीषु कुसुमेषोः ।
[1]मकरपताकेवेयं राजति रोमावली रम्या ॥

[॥ तरुणीव्रज्या ॥]

१४७

Viddhaś III 16
**Shm* II 544 (राजशेखरस्य)
**Sabhyāl* III 77 (ditto)
Pracandap 27

[कण्ठे मौक्तिकमालिकाः स्तनतटे[1] कार्पूरमच्छं[2] रजः
सान्द्रं चन्दनमङ्गके वलयिताः[3] पाणौ मृणालीलताः ।
तन्वी न[4]क्तमियं चकास्ति तनु[5]नी चीनांशुके बिभ्रती
शीतांशोरधिदेवतेव ग](f 36a) लिता व्योमाग्रमारोहतः[6]

१४८

लीलास्खलच्चरणचारुगता[गता[1]]नि
तिर्यग्विवर्तितविलोचनवीक्षितानि ।
वामभ्रुवां मृदु च मञ्जु च भाषितानि
निर्मायमायुधमि[दं[2]] मकरध्वजस्य ॥

---

१४५ [1] MS ते (ti) [2] MS ता [3] Four aksaras lost read युग्मशोभा । किंचित् ? [4] MS म्म १४६ [1] MS अ

१४७ [1] *Pracandap* मौक्तिकदाम गण्डतलयो. [2] *Shm* च्छं [3] *Shm* ता., *Pracandap* विचकिलस्त्रक्शेखरो मूर्धनि [4] *Pracandap* बाढमि [5] *Shm*, *Sabhyāl* शुचि, *Pracandap* तरु [6] *Pracandap* व्योम्नि द्रुत गच्छतः

१४८ [1] Two aksaras omitted [2] Aksara omitted

१४९

दृष्टा काञ्चनयष्टिरद्य[1] नगरोपान्ते भ्रमन्ती मया
तस्यामद्भुतपद्ममेकम[2]निशं प्रोत्फुल्लमालोकितम् ।
तत्रोभौ मधुपौ तथोपरि तयोरेको ऽष्टमीचन्द्रमा
स्तस्याग्रे[3] परिपुञ्जितेन[4] तमसा नक्तंदिवं स्थीयते ॥

*Shm II 17 (रे[वे?]तो-कस्य)

१५०

मध्येहेमलतं कपित्थयुगलं प्रादुर्बभूव क्रम
प्राप्तौ तालफलद्वयं[1] तदनु तन्निःसंधिभावस्थितम् ।
पश्चात्तुल्यसमुन्नतिव्यतिकरं सौवर्णकुम्भद्वया
कारेण स्फुटमेव यत्परिणतं क्वेदं वदामो ऽद्भुतम् ॥

*Shm II 16 (रेतोकस्य)

श्रीवित्तोकर्षितौ ॥

१५१

सितज्योत्स्नालिप्तं मृगमदमसीपत्त्रहरिणं
मुखं तन्मुग्धाया हरति हरिणाङ्कस्य लडितम् ।
क्व चन्द्रे सौन्दर्यं तदधररुचिः[2] सातिशयिनी
क्व बालायास्ते ते क्व चटुलकटाक्षा नयमुषः ॥

यागोकस्य ॥

१५२

आश्चर्यमूर्जितमिदं किमु किं मदीय
श्चित्तभ्रमो यदयमिन्दुरनभ्रे ऽपि ।

---

१४९ [1] MS ष [2] *Shm* °द्भुतमेकपद्मम [3] MS ग्र or ष्ट (*sta*) [4] MS त

१५० [1] MS य [2] *Shm* °द्वय तद्भव [3] MS तु [4] MS सो [5] MS म [6] MS स्वे

१५१ [1] MS य [2] MS °रुचिरः

तत्रापि कापि ननु चित्रपरंपरेय
मुज्जृम्भितं कुवलयद्वितयं यदत्र ॥

श्रीहर्षपालदेवस्य ॥

१५३

*Skm II 347
*Sml P 106b
(गोड्योक-विराजयोः)
*Sml B 132b
(गो जस्य)
Sāhityad p 253 (anon)

निजनयनप्रतिबिम्बैरम्बुनि बहुशः प्रतारिता कापि।
नीलोत्पले ऽपि विमृशति करमर्पयितुं कुसुमलावी[4] ॥

धरणीधरस्य ॥

१५४

यौवनशिल्पसुकाल्पतनूतनतनुवेश्म विशति[1] (fol 36b)
रतिनाथे।
लावण्यपल्लवाङ्कौ मङ्गलकलशौ स्तनावस्याः ॥

१५५

Śp 3347
(कस्यापि)
*Sabhyāl I 114 (anon)
*S-Hārāv C 148 (anon)

एकमेव बलिं बद्ध्वा जगाम हरिरुन्नतिम्।
अस्यास्त्रिबलिबन्धेन सैव मध्यस्य नम्रता ॥

१५६

*Skm II 381
(कस्यचित्)

रोमावली कनकचम्पकदामगौर्या
लक्ष्मीं तनोति नवयौवनसंभृतश्रीः।
त्रैलोक्यलब्धविजयस्य मनोभवस्य
सौवर्णपट्टलिखितेव जयप्रशस्तिः ॥

---

१५३ [1] *Sml P* सत्यु [2] MS प [3] *Sml P* र्प
[4] *Sml P* पुरः पत्युः
१५४ [1] MS ते (*ti*)
१५५ [1] MS द्धा [2] *Sabhyāl* त, *Śp* and *S-Hārāv* have तन्व्यास्त्रि°. [3] MS त्रि
१५६ [1] *Skm* also (B) °बद्ध [2] MS ट्ट (*tta*)

१५७

दृशा दग्धं मनसिजं जीवयन्ति दृशैव या: ।
विरूपाक्षस्य जयिनीस्ता: स्तुवे[2] वामलोचना: ॥

For reff see below

१५८

सो ऽयमभ्युदित: पश्य प्रियाया मुखचन्द्रमा: ।
यस्य पार्वणचन्द्रेण तुल्यतैव हि लाञ्छनम् ॥

१५९

विधायापूर्वपूर्णेन्दुमस्या मुखमभूद्ध्रुवम् ।
धाता निजासनाम्भोजविनिमीलनदु:स्थित: ॥

Ratnā II 35
Sbhā 1313
*Sml B 93b

श्रीहर्षदेवस्य ॥

१६०

मैकं[1] तम:स्तवकमूर्ध्व[2]मपाकृथास्त्व
मे[णां] त्यजास्य[3] विमले नयने[4] गृहाण ।
लोलालकं तरलवीक्षितमायताक्ष्या:
साक्षान्मुखं यदि भवाननुकर्तु[5][6]कामः ॥

*S Hārāv C 85 bis
(anon)

---

१५७ Vīddhaś I 2 *Shm II 107 (राजशेखरस्य) *Sml B 61a (राजशेखरस्य) *Saml 1 (anon) Sbhā 1309 (कस्यापि) Śp 3078 (क्षेमेन्द्रस्य) *Sabhyāl I 17 (राजशेखरस्य) *S-Ratnak V 40 (anon) Hemac pp 139, 172 (anon) Kuvalay ad V 101 (anon) Sāhityad p 259 (anon) Kāvyapr ad X 53 (anon) At p 44 (anon) As p 138 (anon) Ak p 408 (anon) Rasagang p 729 (anon)
[1] MS या [2] Kāvyapr, Sāhityad स्तुमो [3] As चारु
१६० [1] MS म [2] MS र्द्ध [3] MS या [4] S-Hārāv नयने विपुले [5] S-Hārāv ह [6] MS र्त्त

१६१

एतस्मिन्नवदातकान्तिनि कुचद्वन्द्वे कुरङ्गीदृशः
संक्रान्तप्रतिबिम्बमैन्दव[1]मिदं द्वेधा विभक्तं वपुः ।
आनन्दात्तरलस्य पुष्पधनुषस्तत्कालनृत्योत्सव
प्राप्तिप्रोद्यतकांस्यतालयुगलप्रायं समालोक्यते ॥

वसुकल्पस्य ॥

१६२

घना[1]वूरू तस्या यदि यदि विदग्धो ऽयमधरः
स्तनद्वन्द्वं[2] सान्द्रं यदि यदि मुखाब्जं विजयते ।
हतौ रम्भास्तम्भौ हतमहह बन्धूककुसुमं
हतौ हेम्नः कुम्भावहह विहतः पार्वणशशी ॥

१६३

*Skm II 561
*Sml P 77b
(भासस्य)
*Sml B 94a
(भोजदेवस्य)

यदपि (fol 37a) विबुधैः सिन्धोरन्तः कथंचिदुपार्जितं
तदपि सकलं चारु स्त्रीणां मुखेषु विभाव्यते ।
सुरसुमनसः श्वासामोदे शशी च कपोलयो
रमृतमधरे तिर्यग्भूते विषं[च विलोच]ने ॥

लक्ष्मीधरस्य ॥

१६४

तरलनयना तन्वङ्गीयं पयोधरहारिणी
रचनपटुना मन्ये धात्रा शशिद्रवनिर्मिता ।

---

१६१ [1] MS न [2] MS यु
१६२ [1] MS वृ [2] MS न्द्व [3] MS द्दे (di)
१६३ [1] *Sml P* °श्लोक

भवतु महिमा लावण्यानामयं कथमन्यथा
विगलित[तनु[1]]लेखाशेषः कथं च निशाकरः ॥

सुवर्णरेखस्य ॥

१६५

सो ऽनङ्गः कुसुमानि पञ्च विशिखाः पुष्पाणि बाणासनं[1] *Shm II 108
स्वच्छन्दच्छिदुरा मधुव्रतमयी पङ्क्तिर्गुणः का[मुके] ।
एवं[2]साधन उत्महेत स जगज्जेतुं कथं मन्मथ
स्तस्यामोघममूर्भवन्ति न हि चेदस्त्वं[3] कुरङ्गीदृशः ॥

अमरसिंहस्य ॥

१६६

गुरुतां जघनस्तनयोः स्रष्टुमु . . . . लितवतः ।
मुग्धा[1]ङ्गुलिसंधिव[य]निर्गतलावण्यपङ्क्तिला चिं[2]बली॥

१६७

असारं संसारं परिमुषितरत्नं त्रिभुवनं
निरालोकं लोकं मरणशरणं बान्धवजनम् ।
अदर्पं [कन्दर्पं जननयन]निर्माणमफलं
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः ॥

Malatīm x 29
Sarasvatī ad I 135 (anon)
Padyavali XIII 9

भवभूतेः ॥

१६८

त्वद्गण्डस्थलपाण्डु देहि लवलं देहि त्वदोष्ठारुणं
बिम्बं देहि नितां[स्वनि त्वदलकश्या]मं च मे जाम्बवम् ।

*Shm II 70
(वाक्कूटस्य)

---

१६४ [1] Or °रुचि?   [2] MS का
१६५ [1] *Shm* also बाणीसम   [2] *Shm* एतत्सा   [3] MS स्त
१६६ [1] *Sic* MS (for मग्धा?)   [2] MS त्रि

इत्यश्रुसमनोज्ञचाटुजनितव्रीडः पुरन्ध्रीजनो
धन्यानां भवनेषु पञ्जरशुकैराहारमभ्यर्थ्यते ॥

वाक्कूटस्य ॥

१६९

दूर्वाश्यामो जयति . . . . (fol 37b) कपोलः
कस्तूरीभिः किमिह लिखितो द्राविडः पत्त्रभङ्गः ।
प्रत्यग्राणि प्रियकररुहक्रीडितान्येव मुग्धे
शोभाभाञ्जि स्तनकल[श]योस्तन्वि हारो ऽपि भारः ॥

वीर्यमित्त्रस्य ॥

१७०

Sarasvatīk ad I 73, v 170 (anon)

[जनः पुण्यैर्याया]ज्जलधिजलभावं जलमुच
स्तथावस्थं चैनं विदधति शुभैः शुक्तिवदने ।
ततस्तां श्रेयोभिः परिणतिमसौ विन्दति यया
रुचिं तन्वन् पीनस्तनि हृ[दि तवायं विलुठति ॥][6]

अचलसिहस्य ॥

१७१

*Skm II 480 राजशेखरस्य)

न नीलाब्जं चक्षुः सरसिरुहमेतन्न वदनं
न बन्धूकस्येदं कुसुममधरस्तद्द्युतिधरः ।
ममाप्यत्र भ्रान्तिः प्रथममभवन्भृ[ङ्ग] किमु ते
कृतं यत्नैरेभ्यो विरम विरम भ्राम्यसि मुधा ॥

---

१६८ [1] MS सु

१६९ [1] MS त्त्र [2] MS न्द्र

१७० [1] Six aksaras lost in MS [2] Sarasvatīk तु [3] MS तै (kti) [4] Sarasvatīk तु [5] MS न [6] Aksāras lost in MS

१७१ [1] Skm मुकुल [2] Skm विरमेत्यञ्जलिरिय ॥

१७२

मनसिजविजयास्त्रं[1] नेत्रविश्रामपात्रं
तव मुखमनुकर्तुं तन्वि वाञ्छा द्वयोश्च ।
इति जनितविरोधे . . . .[2] दिवायं
हरति तुहिनरश्मिः पङ्कजानां विकाशम् ॥

धर्मकरस्य ॥

१७३

चेतोभुवो रचितविभ्रमसंविधानं
नूनं न गोचरमभूद्दयितानन‍ं वः ।
तत्कान्तिसंपद[म]वाप्स्यत चेच्चकोराः
पानोत्सवं किमकरिष्यत चन्द्रिकासु ॥

१७४

यद्गीयते जगति शस्त्रहता व्रजन्ति
नूनं सुरालयमिति स्फुटमेतदद्य ।
सूच्यग्रमात्रपरिखण्डितवि[ग्रहे]ण
प्राप्तं[1] यतः[2] स्तनतटं तव[3] कञ्चुकेन ॥

Sbhv 1544 (कस्यापि)

१७५

अनेन कुम्भद्वयसंनिवेश
संलक्ष्यमाणेन कुचद्वयेन ।
उन्मज्जता यौवनवारणेन
वापीव तन्वङ्गि तरङ्गितासि ॥

भागुरस्य ॥

---

१७२ [1] MS स्त्र [2] Read वैरिभावा° ?
१७४ [1] MS प्तो [2] MS त [3] *Sbhv* खलु

१७६

(fol 39a) नित[म्ब]श्रीः कं न स्वगतमितयानं जनयति
स्तनाभोगो मुग्धे हृदयमपरस्यापि हरति ।
तवाक्ष्णो ऽपभ्रष्टं[1] स्मरकरशरेन्दीवरदलं
मुखं तद्यस्येन्दुः प्रथमलिखनप्रोञ्छनपदम् ॥

वल्लणस्य ॥

१७७

*Shm II 879 (राजशेखरस्य) सजन्मानौ तुल्यावभिजनभुवाजन्म[1] च सह
प्रवृद्धौ नाम्ना च स्तन इति समाना[2]वुदयिनौ ।
मिथः सीमा[4]मात्रे यदिदमनयोर्मण्डलवतो[5][6]
रपि स्पर्धायुद्धं[7] तदिह हि नमस्यः कठिनिमा[8] ॥

भावाकदेव्या. ॥

१७८

शृङ्गारद्रुममञ्जरी सुखसुधासर्वस्वनिक्षेपभूः
सर्गाभ्यासफलं विधेर्मधुमयी वर्तिर्जगच्चक्षुषाम् ।
लीलानिर्झरिणी[1] मनोजनृपतेर्लावण्यसिन्धोरियं
वेला कस्य मृगेक्षणा सुकृतिनः सौन्दर्यसीमास्थली ॥

हिमाङ्कस्य ॥

---

१७६ [1] MS ॰भष्ट (sta)

१७७ [1] *Shm* ॰वपि अनितुराजन्म (A) and ॰अनिभृता जन्म (B *sic*) [2] MS स (?) सानानि with नि deleted [3] MS ॰द्रुपि [4] MS here inserts ꣾ five times [5] *Shm* भृ [6] MS here inserts ꣾ four times [7] *Shm* सङ्गोत्सुल [8] *Shm* नमस्या कठिनता

१७८ [1] MS ॰निर्झरे (sic) ण [2] MS ञ्जो

१७९

किमियमम[1]तवृत्तिः किं नु लावण्यसिन्धुः
किमथ नलिनलक्ष्मीः किं नु शृङ्गारवल्ली ।
इति[2] नवहरिणाक्ष्याः कान्तिमालोचयन्तो
जगदखिलमसारं भा लोचयामः ॥

१८०

स्मितज्योत्स्नाधौतस्फुरदधरपत्त्रं[1] मृगदृशां[1]
मुखाब्जं चेत्पीतं तदलमिह पीयूषकथया ।
अहो मोहः को ऽयं शतमखमुखानां सुमनसां
यदस्यार्थे ऽत्यर्थं जलधिमथनायासमविशन् ॥

१८१

एतल्लोचनमुत्पलभ्रमवशात्पद्मभ्रमादाननं
भ्रान्त्या[1] बिम्बफलस्य चाजनि दधद्वामाधरो [वे]धसा ।
तस्याः सत्यमनङ्गविभ्रमभुवः प्रत्यङ्गमासङ्गि(f 39b)नी[2]
भ्रान्तिर्विश्वसृजो ऽपि यत्र कियती तत्रास्मदादेर्मतिः[3] ॥

वीर्यमित्रस्य ॥

१८२

आनीलचू[चु]कशिलीमुखमुन्नतैक
रोमावलीविपुलनालमिदं प्रियायाः ।

Sbhv 1545
(कस्यापि)

---

१७९ [1] MS म [2] MS ते (ti) [3] Read भारमालोचयामः ? But the repetition of the verb आलोच् is suspicious

१८० [1] MS °पत्त and °दृशा (read °दृशो ?)

१८१ [1] *Sic* MS (for न्ति ?) [2] MS ना [3] MS र्म्र

१८२ [1] *Sbhv* न्न

उत्तुङ्गसंगतपयोधरपद्मयुग्मं
नाभेरधः कथयतीव महानिधानम् ॥

१८३

*Skm II 109 (कस्यचित्)

यन्नामापि सुखाकरोति[1] कलयत्युर्वीमपि द्यामिव
प्राप्तिर्यस्य यदङ्गसङ्गविधिना किं यन्न निहूयते ।
अन्तः किं च सुधासपत्नमनिशं जागर्ति यद्रागिणां
विश्रम्भास्पदमद्भुतं[4] किमपि तत्कान्तेति तत्त्वान्तरम् ॥

१८४

Śp 3340 (कस्यापि) Sahityad p 290 (anon) Sāhityak ad x 6 (anon) *Sml P 79b (कस्यापि)

तन्वङ्ग्याः[1] स्तनयुग्मेन मुखं न प्रकटीकृतम् ।
हाराय गुणिने स्थानं न दत्तमिति लज्जया ॥

भोजदेवस्य ॥

१८५

हन्तु नाम जगत्सर्वमविवेकि कुचद्वयम् ।
प्राप्तश्रवणयोरक्ष्णोर्न मुक्तं जनमारणम् ॥

धर्मकीर्त्तेः ॥

१८६

Daśar ad IV 50 (anon) At p 14 (anon)

तन्वङ्गीनां[1] स्तनौ दृष्ट्वा शिरः कम्प[य]ते युवा ।
तयोरन्तरसंलग्नां[2] दृष्टिमुत्पाटयन्निव ॥

पाणिनेः ॥

---

१८२ [1] MS तु [2] *Sbhv* प्रोत्तुङ्गपीवर [3] MS भो with the *ā* erased

१८३ [1] MS ते (*ti*) [2] MS सुधासयत्न [3] *Skm* °श्रान्ता [4] *Skm* °स्तुत

१८४ [1] MS ङ्ग्या

१८६ [1] MS ङ्गी *Daśar* and *At* read स्तनावालोक्य तन्वङ्ग्या. [2] *Daśar*, *At* °निर्ममो According to *At* the verse is a समस्या, the second line being added

१८७

शिखरिणि क्व नु नाम कियच्चिरं
किमभि[1]धानमसावकरोत्तपः ।
तरुणि[2] येन तवाधरपाटलं
दशति बिम्ब[फ]लं[4] शुकशावकः ॥

For ref see below

१८८

याता लोचनगोचरं यदि[1] विधेरेणेक्षणा सुन्दरी
नेयं कुङ्कुमपङ्कपिञ्जरमुखी तेनोज्झिता स्यात्क्षणम् ।
नाप्यामीलितलोचनस्य रचनाद्रूपं भवेदीदृशं
तस्मात्सर्वमकर्तृकं जगदिदं श्रेयो मतं सौगतम् ॥

धर्मकीर्त्तेः ॥

१८९

व्यर्थ (fol 40a) विलोक्य कुसुमेषुमसुव्यये ऽपि
गौरीपतीक्षणशिखि[2]ज्वलितो मनोभूः ।
रोषाद्वशीकरणमस्त्रं[3]मुपाददे यत्[4]
सा सुभ्रुवां विजयते जगति प्रतिष्ठा ॥

*Skm II 110

मनोविनोदस्तत. ॥

१९०

आरब्धे दयितामुखप्रति[1]समे निर्मातुमस्मिन्नपि
व्यक्तं जन्मस[मा]नकालं[2]मिलितामंशुच्छटां वर्षति ।

Anargh VII 80
Śp 3325
*S-Hārāv C 84

१८७ *Skm II 476 (धर्मकीर्त्तेः) Sbhi 2030 (कस्यापि) Kuvalay ad v 70 (anon) Dhvanyāl ad I 16 (anon) Sāhityad p 105 (anon) Hemac p 46 (anon) [1] MS भे (bhi) [2] Sāhityad सुमुखि [3] MS ते (ti) [4] MS ल

१८८ [1] MS दे (di) [2] MS श्रे [3] Corrected from त.

१८९ [1] MS खे (khi) [2] MS ले (li) [3] MS स्त्र [4] MS षा

१९० [1] MS ते (ti) [2] Śp समानमेव, so S-Hārāv, which also reads व्यक्ता

आत्मद्रोहिणि रोहिणीपरिवृढे पर्यङ्कपङ्केरुहः
संकोचादतिदुःस्थितस्य न विधेस्तच्छिल्पमुन्मीलितम् ॥

१९१

Anargha vii 81
Śp 3321
(कस्यापि)
*Sml P 114b
*Sml B 143b

अनेन रम्भोरु भवन्मुखेन[1]
तुषारभानोस्तुलया धृतस्य ।
ऊनस्य नूनं प्रतिपूरणाय
तारा स्फुटन्ति [प्रति]मानखण्डाः ॥

१९२

Anargha vii 82
*Sml B 143b
Ak pp 92-3
(anon)

गोत्रे साक्षादजनि भगवानेष यत्पद्मयोनिः
शय्योत्थायं यदखिलमहः प्रीणयन्ति द्विरेफान् ।
एकाग्र्यां[2] यद्दधति भगवत्युष्णभानौ च भक्तिं
तत्प्रापुस्ते[3] सुतनु वदनौपम्यमम्भोरुहाणि ॥

मुरारेरमी ॥

१९३

*Skm II 365
(कस्यचित्)
Sbh 1523
(विज्जाकायाः)
Śp 3322 (,,)
*S Hārā C 74
(विज्जायाः).

कोषः स्फीततरः[1] स्थितानि परितः पत्त्राणि दुर्गं जलं
मैत्रं मण्डलमुज्ज्वलं चिरमधोनीतास्तथा कण्टकाः ।
इत्याकृष्टशिलीमुखेन रचनां कृत्वा तदत्यद्भुतं
यत्पद्मेन जिगीषुणापि न जितं मुग्धे[5] त्वदीयं मुखम् ॥

---

१९० [1] MS हे (he) [2] Śp थ, MS ते (te) [3] MS here inserts ल (anticipating ल्प) S-Hārā reads °दुपरि स्थितन विधेर्य (sic)

१९१ [1] Śp, Anargha (Calcutta) तवाननेन, Anargha (Kāvyamālā) as MS [2] Śp पीयूष [3] MS बो [4] Anargha (Kāvyamālā), Śp, Sml परि [5] Anargha, Śp, Sml र

१९२ [1] MS खे (khe) [2] MS, Ak ग्र [3] MS °युक्तो

१९३ [1] MS ह [2] Śp मित्रैर्मं, S-Hārā मन्त्रैर्मं [3] Skm च [4] Sbhv प्य [5] MS चे [6] Skm तवेद

१९४

सा राम (fol 40b) णीयकनिधेरधिदेवता वा
सौन्दर्यसारसमुदायनिकेतनं वा ।
तस्याः सखे नियतमिन्दुसुधामृणाल
ज्योत्स्नादि कारणमभून्मदनश्च वेधाः ॥

Mālatīm I 20
Al p 281

भवभूते. ॥

१९५

उपप्राकाराग्रं प्रहिणु नयने तर्कय मना
गनाकाशे को ऽयं गलितहरिणः शीतकिरणः ।
सुधाबद्धग्रासैरुपवनचकोरैरनुसृतां
किरज्ज्योत्स्नामच्छां नवलवलपा[क]प्रणयिनीम् ॥

For ref see below

राजशेखरस्य ॥

१९६

चन्द्रो जडः कदलकाण्डमकाण्डशीत
मिन्दीवराणि च विसूचितविभ्रमाणि ।

Viddhaś II 4

---

१९४ [1] MS here repeats निधेर् [2] MS प [3] MS here inserts and erases व

१९५ *Viddhaś* I 31 *Śp* 3516 (कस्यापि) **Sml B* 84b **Saml* 124 (anon) *Sarasvatīk ad* IV 49 (anon) *Citram* p 45 (anon) *Kuvalay ad* 35 (anon) Hemac p 264 (anon) *Daśar ad* IV 50 (anon) [1] *Sarasvatīk*., *Citram*, Hemac, *Daśar*, *Kuvalay* place pādas *c-d* before *a-b* [2] MS त: [3] MS मु [4] *Saml* प्रा [5] *Viddhaś* त., *Daśar* reads °रैः कवलिता [6] *Viddhaś*, *Citram*, *Śp*, *Saml*, *Daśar*, *Kuvalay* लवलिफलपाक, Hemac लवल°, *Sarasvatīk* नवलवलि, MS नवलवलाप्र° [7] *Saml* नी

१९६ [1] *Viddhaś* लि

येनाक्रियन्त सुतनोः स कथं विधाता
किं चन्द्रिकां क्वचिदशीतरुचिः प्रसूते ॥

अयमपि तस्यैव ॥

१९७

अलीकव्यामुक्तप्रचुरकवरीबन्धनमिषा
दुदञ्चद्दोर्वल्लीद्वयधृतपरीवेशनिहितः ।
अयं जृम्भारम्भस्फटिकशुचिदन्तांशुनिचयो[1]
मुखेन्दुर्गौराङ्ग्या[2] [3] गलितमृगलक्ष्मा[4] विजयते ॥

१९८

रम्भोरु क्षिप लोचनार्धमभितो बाणान्वृथा मन्मथः
संधत्तां धनुरुज्झतु क्षणमितो[1] भ्रूवल्लिमुल्लासय ।
किं चान्तर्निहितानुरागमधुरामव्यक्तवर्णक्रमां
मुग्धे वाचमुदीरयास्तु[3] जगतो वीणासु भेरीभ्रमः ॥

१९९

*Skm II 606 (पाणिने.) Śp 3803 (चपलस्य) Padyarac IX 32 (anon) Aś ad II 3 (anon)

पाणौ पद्मधिया मधूकमुकुलभ्रा[1] (fol 41a) न्त्या तथा गण्डयो
र्नीलेन्दीवरशङ्कया[2] नयनयोर्बन्धूकबुद्ध्याधरे ।
लीयन्ते कवरीषु बान्धवजनव्यामोहजातस्पृहा[4]
दुर्वारा मधुपाः कियन्ति सुतनु[5] स्थानानि रक्षिष्यसि ॥

---

१९७ [1] MS न्ता [2] MS ङ्ग्या [3] MS here repeats लित [4] MS क्ष्मी

१९८ [1] MS तौ [2] MS प [3] MS स्त

१९९ [1] Skm, Śp, Aś, Padyarac °कुसुम [2] MS पा [3] Śp कवरीभरे निकुञ्ज, Padyarac °कुले [4] Skm also (B) °मुग्धाशया [5] Skm, Śp, Aś, Padyarac तरुणि

२००

दृष्टाः शैवलमञ्जरीपरिचिताः सिन्धोश्चिरं वीचयो
रत्नान्यप्यवलोकितानि बहुशो युक्तानि मुक्ताफलैः ।
यत्तु[1] प्रोज्झितलाञ्छने[2] हिमरुचावुन्निद्रमिन्दीवरं
संसक्तं च मिथो रथाङ्गयुगलं[3] तत्केन[4] दृष्टं पुनः ॥

विक्रमादित्यस्य ॥

*Shm ii 18 (रथाङ्गस्य)

२०१

अन्योन्योपमितं युगं निरुपमं ते ऽयुग्ममङ्गेषु यत्
सो ऽयं सिक्थकं[1]मास्यकान्तिमधुनस्तन्वङ्गि चन्द्रस्तव ।
त्वद्वाचां स्वरमाचिकां मदकलः पुंस्कोकिलो ऽप्येषय
त्यभ्यासस्य किमस्त्यगोचरमिति प्रत्याशया मोहितः ॥

२०२

लावण्यद्रविणव्ययो न गणितः क्लेशो महान् स्वीकृतः
स्वच्छन्दं वसतो जनस्य हृदये चिन्ताज्वरो निर्मितः[1] ।

For ref see below

---

२०० [1] MS न्तु [2] MS ञ्छा [3] Shm °मिथुन [4] Shm तत्कुत्र

२०१ [1] MS repeats the क [2] Corrected (?) from प्यो

२०२ *Shm ii 339 Sbh 1472 *Sml P 73a *Sml B 87a Aucityav ad v 11 Dhvanyāl ad iii 41 As p 67 (anon) Hemac p 261 (anon) Kuvalay ad v 71 (anon) *Sabhyāl i 25 (anon) *S-Ratnak v 337 (anon) *S-Mukt iii 87 (anon) *S-Hārāv C 88 [1] Dhvanyāl, S-Ratnak, Kuvalay °निर्जित. [2] Dhvanyāl, S-Ratnak, Kuvalay चरतो°, Aucityav, Sbhr, Hemac, As, Sml P, S-Hārāv °दस्य सुखं जनस्य वसतश्चि° [3] S-Mukt शङ्काज्वरो, As, Hemac चिन्तानलो दीपित.

एषापि स्वगुणानुरूपरमणाभावाद्वराकी हता
को ऽर्थश्चेतसि वेधसा विनिहितस्तन्व्यास्तनुं तन्वता ॥
धर्मकीर्त्तेः ॥

२०३

Sbhv 1463
Śp 3269
(कस्यापि)
*Padyāmṛtat III 10 (anon.)

किं कौमुदीः शशिकलाः सकला विचूर्ण्य
संयोज्य चामृतरसेन पुनः प्रयत्नात् ।
कामस्य घोरहरहूंकृतिदग्धमूर्तेः
संजीवनौषधिरियं विहिता विधात्रा ॥
भट्टोद्भटस्य ॥

२०४

For refs see below

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः[1] स्वयं नु मदनो मासः स[2] पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्र[भ](fol 41b)वेन्मनोहरमिदं रूपं पुराणो मुनिः ॥
कालिदासस्य ॥

---

२०२ [1] *Dhvanyāl*, *Aucityav*, *Sbhv*, *As*, Hemac, *Sml P*, *S-Hārāv* °पि स्वयमेव तुल्यरमणा° [2] MS न्य, *Subhyāl* reads this line नो जाने सखि किं कृत नु विधिना° [3] MS ने (*ni*) [4] MS न्व्या, *S-Ratnak* तन्वीमिमा°

२०३ [1] Corrected from शि [2] MS हे (*hi*) [3] MS वे (*vi*)

२०४ *Vikramorvaśī* I 9 *Sbhv* 1467 *Śp* 3268 *Sāhityad* p 297 (anon.) *Daśar ad* IV 2 (anon.) *Sarasvatīk ad* III 40 (anon.) *Kāvyaprad ad* X 6 (anon.) *As* p 68 (anon.) *Citram* pp 66, 102 (anon.) *Citrakh* pp 29-30 (anon.) *Rasagang* p 410 (anon.) *Ak* pp 199, 282 (anon.) **S-Hārāv* C 198 [1] *Daśar*, *Sarasvatīk*, and one MS of the *Vikramorvaśī* (see Bombay Sanskrit Series edition) °निधिः *S-Hārāv* ends (a) with कान्तापुति., *Vikram* also कान्तप्रभः [2] All other texts (exc *Vikram* MS B स) मासो नु [3] MS वै [4] *Sbhv* °नोचितम्, *Sarasvatīk* °नोरम [5] *As* also विधिः [6] MS. पु

२०५

तद्वक्त्रं यदि मुद्रिता शशिकला[1] हा हेम सा चेद्द्युति-
स्तच्चक्षुर्यदि हारितं कुवलयैस्तच्चेत्स्मितं का सुधा।
धिक्कन्दर्पधनुर्भ्रुवौ[3] य[दि] च[4] ते किं वा बहु[5] ब्रूमहे
यत्सत्यं पुनरुक्तवस्तुविमुखः सर्गक्रमो वेधसः ॥

राजशेखरस्य ॥

For reff see below

२०६

तस्या[1] मुखस्यायतलोचनायाः[2]
कर्तुं न शक्तः सदृशं प्रियायाः।
इतीव[3] शीतद्युतिरात्मबिम्बं
निर्माय निर्माय पुनर्भिनत्ति[4]॥

For reff see below

---

२०५ *Bālar* ii 17 *Viddhaś* i 14 **Skm* ii 491 *Śp* 3373 (कस्यापि) **Sml B* 100a **Sabhyāl* i 35 *Sarasvatīk ad* iv 40 (anon) *At* pp 38 and 59 *Sāhityad* p 336 (anon) Hemac p 153 **S-Hārāv* C 180 [1] *Bālar*, *Viddhaś*, *Skm*, *Śp*, *Sabhyāl*, *Sarasvatīk*, *Sāhityad*, Hemac, *S-Hārāv* था, *At* p 38 ला, p 59 था *At*, *S-Hārāv* end with तच्चेत्स्मित . . . from (*b*) [2] MS मु In this line *Bālar*, *At*, *S-Hārāv* read सा दृष्टि . . . °स्ताश्चेद्गिरो धिङ्मधु, so *Śp*, *Sarasvatīk*, Hemac. from °स्ताश्चे onwards [3] MS वो [4] *Viddhaś*, *Skm*, *Sabhyāl*, *Sarasvatīk*, च यदि, *Bālar* and *At* read in (*c*) सा चेत्कान्तिरतन्त्रमेवकनक, so Hemac, but interchanging these words with the beginning of (*b*) [5] MS ह्न [6] MS स्व, *Bālar*, *Śp*, *Sarasvatīk*, Hemac read °विरस., *At* p 38 °विरसः, p 59 °विमुखः, and in p 38 continues सृष्टिक्रमो

२०६ *Sbhv* 1517 (श्रीहर्षस्य) *Śp* 3320 (कस्यापि) **S-Ratnak* v 154 (anon) **S-Mukt* ii 37 (anon) **S-Hārāv* C 88 (कस्यापि) [1] *S-Mukt* has (*c*)-(*d*) preceding (*a*)-(*b*) [2] *Sbhv*, *Śp*, *S-Ratnak*, *S-Hārāv* °खस्यातिमनोहरस्य [3] *Sbhv*, *Śp*, *S-Ratnak*, *S-Mukt*, *S-Hārāv* अद्यापि [4] *S-Hārāv* °र्भनक्ति

२०७

तुलितस्त्वन्मुखेनायं यदुन्नमति चन्द्रमाः ।
अवनम्रमुखे व्यक्तमेतेनैवास्य लाघवम् ॥

२०८

*Shm II 363 (कस्यचित्)

तपस्यतीव चन्द्रो ऽयं त्वन्मुखेन्दुजयाशया[2]।
कृशः शम्भुजटाजूटतटिनीतटमाश्रितः ॥

२०९

तव तन्वि[1] स्तनावेतौ कुर्वाते विग्रहं गुरुम् ।
अन्योन्यमण्डलाक्रान्तौ नष्टसंधी नृपाविव ॥

२१०

प्रायः स्तनतटीभूमिः प्रकामफलदायिनी ।
यस्यामग्रे करं दत्त्वा योज्यते नखलाङ्गलम् ॥

२११

अमीषां मण्डलाभोगः स्तनानामेव शोभते ।
येषामुपेत्य सोत्कम्पा राजानो ऽपि करप्रदाः ॥

२१२

Balar I 42

लक्ष्मीं वक्षसि कौस्तुभस्तवकिनि प्रेम्णा[1] करोत्यच्युतो
देहार्धे वहति त्रिपिष्टपगुरुर्गौरीं स्वयं शंकरः ।
शङ्के पङ्कजसंभवस्तु भगवानद्यापि बाल्यावधेः
सर्वाङ्गप्रणयां प्रियां कलयितुं दीर्घं[2] तपस्तप्यते ॥

---

२०८ [1] *Shm* शीतांशुस्त्व   [2] *Shm* °जिगीषया
२०९ [1] MS °न्वङ्गे
२१२ [1] MS म्ना   [2] MS *sic*

॥ अनुरागव्रज्या ॥

२१३

दत्त्वा[1] वामकरं नितम्बफलके लीलावलन्मध्यया
व्यावृत्तस्तनमङ्गचुम्बिचिबुकं स्थित्वा तया मां प्रति ।
अन्तर्विस्फुर[दि] (fol 42a) न्द्रनीलमणिमन्मु[2]क्तावली-
  मांसलाः
सप्रेम प्रहिताः स्मरज्वरमुचो द्वित्राः कटाक्षच्छटाः[3]॥

२१४

आकर्णान्तविसर्पिणः कुवलयच्छायामुषश्चक्षुषः
क्षेपा एव तवाहरन्ति हृदयं किं संभ्रमेणामुना ।
मुग्धे केवलमेतदाहितनखोत्खाताङ्कमुत्पांशुलं[3]
बाह्वोर्मूलमलीकमुक्तकवरीबन्धच्छलाद्दर्शितम् ॥

२१५

तरत्तारं तावत्प्रथममथ चित्रार्पितमिव[1]
क्रमादेवापाङ्गे सहजमिव लीलामुकुलितम् ।
ततः किंचित्फुल्लं[3] तदनु घनबाष्पाम्बुलहरी
परिक्षामं चक्षुः पततु मयि तस्याः मृगदृशः ॥

वीर्यमित्रस्य ॥

*Skm II 464
*Sml P 65b
*Sml B 72b

---

२१३ [1] MS त्वो   [2] MS त्मु   [3] MS टी

२१४ [1] MS र्त्ता   [2] MS ना   [3] *Sic* MS (for °मत्यंसल ?)

२१५ [1] MS च   [2] Aksara partly lost   [3] *Skm* °त्फुसं

[4] *Sml B* तन्वा   [5] MS द्र

२१६

*S -Hārāv C 216 (वीर्यमित्रस्य)

[ली]लाताण्डवितभ्रुविभ्रमवलद्वक्त्रं कुरङ्गीदृशा
साकूतं च सकौतुकं च सुचिरं न्यस्ताः किलास्मान् प्रति
नी[ला]ब्जव्यतिमिश्र[1]केतकदलद्राघीयसीनां स्रजां
सोद[2][र्यो]ः सुहृदः स्मरस्य सुधया दिग्धाः कटाक्षच्छटाः।

राजशेखरस्य ॥

२१७

For reff see below

दृष्टा दृष्टिमधो दधाति कुरुते नालापमाभाषिता
शय्यायां परिवृत्य तिष्ठति [1]बलादालिङ्गिता वे[प]ते।
निर्या[2]न्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते
जाता वामतयैव मे ऽद्य सुतरां प्रीत्यै नवोढा प्रिया[3]॥

२१८

*Skm II 465

त[1]द्व्रीडाभरभुग्नमास्यकमलं विन्यस्य जानूपरि
प्रोद्यत्पक्ष्मनिरी[2] (fol 42b) क्षितं विजयते सप्रेम वामभ्रुवः।
हास्यश्रीलवलाञ्छिता च यदसावस्याः कपोलस्थली
लोलल्लोचनगोचरं व्रजति स स्वर्गादपूर्वो विधिः ॥

प्रद्युम्नस्य ॥

---

२१६ [1] *S -Hārāv* च [2] MS स्र [3] MS दा

२१७ *Nāgānanda* III 4 (35) **Skm* II 41 (श्रीहर्षदेवस्य) *Sbhi* 2072 (श्रीहर्षदेवस्य) *Śp* 3672 (श्रीहर्षस्य) *Sāhityad* p 40 (anon) *Sarasvatīk ad* v 169 (anon) **Sabhyāl* IV 127 (श्रीहर्षस्य) [1] MS च [2] MS या [3] *Śp* has बाला वामतया प्रियस्य नितरां प्रीत्यै नवोढाभवत्, *Sarasvatīk* °यैव संप्रति मम, *Sabhyāl* °या प्रियस्य नितरां प्रिया, the MS याचा मारामतयैव, the मा being deleted

२१८ [1] *Skm* य [2] In the MS the vowel of री is lost [3] *Skm* या

२१९

बिसकवलनलीलामग्नपूर्वार्धकायं
कमलमिति[1] गृहीतं हंसमाशु त्यजन्त्याः ।
विरतचलिततारस्फारनेत्रं यदस्या
श्चकितमिह न दृष्टं मूढ तद्वञ्चितो ऽसि ॥

२२०

अयं लोलन्मुक्तावलिकिरणमालापरिकरः
[स्फु[1]]टस्ये[2]न्दोर्लक्ष्मीं क्षपयितुमलं मन्मथसुहृत् ।
विशालः श्यामायाः स्खलितघननीलां[3]शुकवृ[4]तिः[5]
स्तनाभोगः स्निह्यन्मसृणघुसृणालेपसुभगः ॥

*Skm II 378

२२१

मन्ये हीनं स्तनजघन[यो[1]]रेकमाशङ्क्य धात्रा
प्रारब्धो ऽस्याः परिकलयितुं पाणिना[2]दाय मध्यः ।
लावण्यार्द्रे कथमितरथा तत्र तस्याङ्गुलीना
मामग्नानां त्रिवलिवलयच्छद्मना भान्ति मुद्रा[ः ॥]

२२२

यत्रै[1]तन्मृगनाभिपत्त्रतिलकं पुष्णाति लक्ष्मश्रियं
यस्मिन् हासमयो विलिम्पति दिशो लावण्यबालातपः।

---

२१९ [1] MS ते (*ti*)

२२० [1] This aksara is partially visible in the MS [2] MS ये (*yi*) [3] *Skm* ली [4] MS °लाकृष्टु [5] *Skm* ति

२२१ [1] This aksara is partially visible [2] MS नाऽ

२२२ [1] MS त्रा

तन्मित्रं कुसुमायुधस्य दधती बालान्धकाराञ्चिता
तारैका[व]लिमण्डनेयमनघा श्यामा वधूर्दृश्यताम् ॥
मनोविनोदस्वामी ॥

२२३

वक्त्राम्बुजं भुजमृणाललतं प्रियाया
लावण्यवारि बलिवीचि वपुस्तडागम् ।
तत्प्रेमपङ्कपतितो न समुज्जिहीते
मच्चित्तकुञ्ज(fol 43a)रपतिः परिगाहमानः ॥

२२४

For reff see below

कृच्छ्रेणोरुयुगं व्यतीत्य सुचिरं भ्रान्त्वा नितम्बस्थले
मध्ये ऽस्यास्त्रिबलीतरङ्गविषमे नि[ष्पन्दतामागता ।
मद्दृष्टिस्तृषि]तेव संप्रति शनैरारुह्य तुङ्गौ स्तनौ
साकाङ्क्षं मुहुरीक्षते जललवप्रस्यन्दिनी लोचने ॥
श्रीहर्षदेवस्य ॥

२२५

Śp 566 (Bilhana and his Guru) Kāvyapr ad vii 4 (anon) Śāntiśataka ii 23 (anon) S Ratnak *vii 3 (anon)

अलमतिचपलत्वात्स्वप्नमायोपमत्वा
त्परिणतिविरसत्वात्संगमेन प्रियायाः ।

---

२२२ [1] MS न्त्र

२२३ [1] MS क्ता

२२४ *Ratnāvalī* ii 36 **Sml P* 72b (anon) **Sml B* 85b *Dhvanyāl ad* ii 4, Comm *Sarasvatīk ad* v 185 *As* (Jayaratha's Comm), pp 6-7 Hemac p 104 Comm [1] *Ratnāv*, *Sarasvatīk*, *Dhvanyāl* (some MSS) छच्छ्रादू° [2] *Sml P* विलङ्घ्य [3] *Sml P* न्ता, Hemac °रभ्रान्ता [4] MS स्थि [5] *Sarasvatīk* °भर

२२५ [1] MS here repeats लम [2] MS म [3] *Śp*, *Kāvyapr*, *S-Ratnak*, *Śāntiś* °नाङ्गना

इति यदि श[तकृत्वस्तत्त्वमालोचयाम
स्त]दपि न हरिणाक्षी[1] विस्मरत्यन्तरात्मा ॥

२२६

नपुं[1]सकमिति ज्ञात्वा प्रियायां[2] प्रहितं मनः ।
रमते तच्च तत्रैव[4] हताः पाणि[नि]ना वयम् ॥

For refs see below

२२७

हारोऽयं हरिणा[क्षीणां लुठति स्तनमं[1]]डले ।
मुक्तानामप्यवस्थेयं के वयं स्मरकिंकराः ॥

धर्मकीर्त्तेरमी ॥

Amaru 138 Sāhityad p 333 (anon) Śāntyal ad XI 8 (anon)

२२८

सा सुन्दरीति तरुणीति तनूदरीति
मुग्धेति मुग्धवदनेति मुहुर्मुहु[1]र्मे ।
कान्तामयं[2] विरहि[3]णीमनुरन्तुकामः
कामातुरो जपति मन्त्रमिवान्तरात्मा ॥

वीर्यमित्रस्य ॥

---

२२५ [1] MS ची [2] *S-Ratnak* त्व

२२६ *Sbhv* 1232 (कस्यचित्) *Śp* 3451 *Aś ad* XX 17 (anon) *Kuvalay ad* 89 **S-Ratnak* VI 462 (anon) [1] MS °पु(यु?)न्स [2] MS here inserts ङ [3] *Sbhv* त्वां प्रति प्रेषित मया, *Kuvalay*, *S-Ratnak*, *Aś* प्रियायै प्रेषितं [4] *Sbhv* मनस्तत्रैव रमते, *Śp*, *Kuvalay*, *S-Ratnak* तत्तु तत्रैव रमते, *Aś* तच्च तत्रैव, *S-Ratnak* also हृता (?) for हता

२२७ [1] Eight aksaras damaged or lost in MS

२२८ [1] MS ह्र [2] MS य?, the anusvāra is lost [3] Three aksaras partly lost [4] MS य

२२९

For reff see below

सा बाला वयमप्रगल्भमनसः[1] सा स्त्री वयं कातराः
[2]साक्रान्ता जघनस्थलेन गुरुणा[3] गन्तुं न शक्ता वयम् ।
सा पीनोन्नतिमत्पयोधरयुगं[4] धत्ते सखेदा वयं
दोषैरन्यजनाश्रितैरपटवो[5] जाताः स्म इत्यद्भुतम् ॥

धर्मकीर्त्तेः ॥

२३०

Mālatīm I 27
Sbhv 1297
(भवभूतेः)
Sarasvatīk ad v 165
At p 41 (anon)
*Saml 131 (anon)

अलसवलित[1]मुग्ध[2]स्निग्धनिष्पन्दमन्दै
रधिक[3]विकसदन्तर्विस्मयस्मेरतारैः ।
हृदयमशरणं मे पक्ष्मलाक्ष्याः कटाक्षै[4]
रपहृतमप[5]विद्धं पीतमुन्मूलि[6]तं च[7] ॥

२३१

For reff see below

यान्त्या मुहुर्वलितकन्धरमाननं त
दावृत्तवृन्त[1]शतपत्त्रनिभं वहन्त्या ।

---

२२९ *Skm II 397 (अमरो.) Sbhv 1346 (anon) Amaru 34 Vāmana ad IV 3, 12 (anon) Sarasvatīk ad III 17 (anon) As p 130 (anon) Aś ad XIII 1 (anon) Hemac p 271 (anon) Sāhityad p 324 (anon) *S-Mukt I 45 (anon) [1] Sbhv, Sarasvatīk, Alamkāraś °वच [2] All other texts transpose this and the next line [3] MS ग्रुर [4] Sbhv °भर, Hemac पीनं परिणाहिन स्तनभर [5] As °समा

२३० [1] At लु [2] Saml ग्धा [3] Sbhv °भस [4] MS क्षै [5] Mālatīm also पि [6] MS न्मी [7] Sbhv °त वा, Mālatīm also °त नु

२३१ Mālatīm I 28 Daśar ad I 26, IV 45 (Mālatīm) Sarasvatīk ad V 138 As p 27 (anon) Ak pp 30 and 46 (anon) Citram p 18 (anon) *Saml 132 (anon) *Sabhyāl VIII (29a) *Rasavilāsa § 14 (anon) Hemac p 180 Comm (anon) [1] Daśar त्त

दिग्धो ऽ(fol 43b)मृतेन[1] च विषेण च पक्ष्मलाक्ष्या
गाढं निखात इव मे हृदये कटाक्षः ॥

२३२

परिच्छेदव्यक्तिर्भवति न पुरःस्थे ऽपि विषये
भवत्यभ्यस्ते ऽपि स्मरणमतथाभावविरसम् ।
न संतापच्छेदो हिमसरसि वा चन्द्रमसि वा
मनो निष्ठाशून्यं भ्रमति च किमप्या[1]लिखति च ॥

Mālatīm I 30

२३३

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः को ऽप्यन्तर्जडयति च तापं च कुरुते[2]॥
भवभूतेरमी ॥

Mālatīm I 2(
Kāvyapr ad IV 42, X 2 (anon)
*Sml B 76a
As p 122 (anon)
Kāvyapr ad ad IV 20, X 25 (anon)

२३४

गच्छन्त्या मुहुरर्पितं मृगदृशा तारस्फुरद्वीक्षणं
प्रान्तभ्राम्यदसंञ्जितभ्रु यदिदं किं तन्न जानीमहे ।
क्वापि स्वेदसमुच्चयः स्नपयति क्वापि प्रकम्पोद्गमः[3]
क्वाप्यङ्गेषु तुषानलप्रतिसमः कन्दर्पदर्पक्रमः ॥

२३५

अमृतसिक्तमिवाङ्गमिदं यदि
भवति तन्वि तवा[ङ्ग]तवीक्षितैः ।

---

२३१ [1] *Rasavilāsa* गरलेन

२३२ [1] MS ०ख्या

२३३ [1] MS ०ध्वन्सा [2] *Daśar ad* IV 24 and 63 gives this line as *d* of the verse विनिश्चेतुं शक्यो *Uttar* I 36.

२३४ [1] MS द्व [2] MS म [3] MS ग:

२३५ [1] MS मे (*mi*) [2] Four doubtful aksaras

अधरमिन्दुकरादपि . . .
.[1] शुभयन्त्य रुणादपि किं दृशम् ॥

२३६

सा नेत्राञ्जनतां पुनर्व्रजति मे वाचामयं विभ्रमः
प्रत्यासन्नकरप्रहेति च करी . . . . ।
एतावद्बहु यद्बभूव कथमप्येकत्र मन्वन्तरे
निर्माणं वपुषो ममोरुतपसस्तस्याश्च वामभ्रुवः ॥

वज्ञणस्य[2] ॥

२३७

For ref see below

[नून][1]माज्ञाकरस्तस्याः सुभ्रुवो[2] [मकरध्वजः ।
यतस्तन्नेत्रसं]चारसू[3]चिते[4]षु प्रवर्तते ॥

२३८

आदौ[1] विस्मयनिस्तरङ्गमनु च प्रेङ्खोलितं साध्वसे
व्रीडानम्रम[तः] क्षणं प्रविकसत्त्रा . . . .
. . . . दजाभिजात्यकलना . . . .
. . . (fol 44a)रि कथंकथंचिदगमत्प्रेयांसमेणीदृशः॥

चित्तूकस्य ॥

---

२३५ [1] Four syllables omitted

२३६ [1] MS त्व [2] This name is doubtful, the aksaras being almost entirely lost

२३७ Bhartrhari I 11 *Sbhv* 1227 (कस्यचित्) *Śp* 3298 (कस्यापि) **Sml B* 92a (बाणस्य) **S-Ratnak* v 133 (anon) **S-Mukt* v 7 (anon) [1] Doubtful, the two aksaras being partially lost [2] *Sbhv* ०भगो [3] ? मू in MS [4] MS तै, *S-Mukt* reads यत्सुभ्रू०तोऽपि प्र०

२३८ [1] MS है

२३९

गच्छति पुरः शरीरं धावति पश्चादसंस्थितं[1] चेतः ।
चीनांशुकमिव केतोः प्रतिवातं[2] नीयमानस्य ॥

कालिदासस्य ॥

Śakunt I\ 33 (\ nn) *Sabhyā\ XIII 29 a-b

२४०

अयं ते विद्रुमच्छायो मरुमार्ग[2] इवाधरः ।
करोति कस्य नो बाले[3] पिपासाकुलितं मनः ॥

दण्डिन. ॥

For reff see below

२४१

अस्यास्तुङ्गमिव स्तनद्वयमिदं निम्नेव नाभी स्थिता
दृश्यन्ते विषमोन्नताश्च बलयो भित्तौ समायामपि ।
अङ्गे च प्रतिभा[ति] मार्दवमिदं स्निग्धः स्वभावश्चिरं
प्रेम्णा मन्मुखचन्द्रमीक्षत इव स्मेरेव [व]क्तीव च[3] ॥

Śakuntala (Bengal recension) 140

२४२

स्वच्छन्दं स्वगृहाङ्गणं भ्रमति सा मद्दर्शनाल्लीयते
धन्यान् पश्यति लोचनेन सकलेनार्धेन मां वीक्षते ।
अन्यान्मन्त्रयते पुनर्मयि गते मौनं समालम्बते
नीतो दूरमहं तया दयितया सामान्यलोकादपि ॥

---

२३९ [1] *Śak* also स्तु, so *Sabhyāl* [2] *Sabhyāl* °तोरभि

२४० **Skm* II 358 (कस्यचित्) *Kuvalay ad* 166 (anon) *Sarasvatīk ad* V 165 (anon) **Padyaveṇī* III 44 (कस्यापि) [1] *Kuvalay* एष, *Padyaveṇī* तवैष *Sarasvatīk* transposes the two lines [2] *Skm* °देश [3] *Skm* मुग्धे, *Sarasvatīk* कस्य नो कुरुते तन्वि, *Kuvalay* कस्य नो तनुते तन्वि [4] MS शा (perhaps corrected to सा), *Padyaveṇī* तृष्णया

२४१ [1] MS आ, *Śak* also तस्या [2] *Śak* °ग्धप्रभावाश्चि [3] *Śak* °खमीषदी° and °रा च वक्तीव माम्

२४२ [1] MS रं

२४३

स खलु सुकृतभाजामग्रणीः सो ऽतिधन्यो
विनिहितकुचकुम्भा पृष्ठतो यन्मृगाक्षी ।
बहलतरनखाग्रक्षोदविन्यस्तमार्गे
शिरसि ढमिति लिक्षां[1] हन्ति हूंकारगर्भम् ॥

२४४

For reff see below

अलसयति गात्र[1]मधिकं भ्रमयति चेतस्तनोति संतापम् ।
मोहं च मुहुः कुरुते विषविषमं वीक्षितं[2] तस्याः[3] ॥

२४५

For reff see below

मत्तेभकुम्भपरिणाहिनि कुङ्कुमार्द्रे
कान्ता[1]पयोधरयुगे रतिखेदखिन्नः ।
व[क्षो] निधाय भुजपञ्जरमध्यवर्ती
धन्यः क्षपाः क्षपयति क्षणलब्धनिद्रः[2]॥

२४६

For reff see below

धिक्तस्य मूढमनसः कुकवेः कवित्वं
यः स्त्रीमुखं च शशिनं च समीकरोति ।

---

२४३ [1] MS च्चां

२४४ *Sbhv* 1262 (भट्टकर्णाटकस्य) *Śp* 3302 (anon) **Sabhyāl* 29*b* (anon) Cf Govardhana's *Āryāsaptaśatī* 54 [1] *Śp*, *Sabhyāl* भ्रमयति शरीर° [2] *Śp*, *Sabhyāl* मोहं मुहुश्च कुरुते विषमिव विषम तु वी(*Sabhyāl* विषमे)क्षण [3] *Sbhv* न्याः

२४५ *Sbhv* 1292 (कस्यापि) *Śp* 3693 (भर्तृहरेः) 3951 (कस्यापि) *Pañcat* (Kosegarten) I 224 **Sabhyāl* IV (21*a*) (भर्तृहरेः) *Padyaracanā* VIII 39 (भर्तृहरेः) [1] *Pañcat* तस्याः [2] In this line *Pañcat* reads स्वप्ने कदा क्षणमवाप्य तदीयसङ्ग

२४६ *Śp* 3323 (श्रीधनददेवाना) **S-Rātnak* V 155 (anon) **S-Mukt* IV 14 (anon) **S-Ślokāh* 3*b* (anon) **S-Hārāv* C 85 (धनदस्य) [1] *Śp*, *S-Ratnak*, *S-Mukt*, *S-Ślokāh*, *S-Hārāv* मन्द [2] *Śp*, *S-Ratnak* °खं तुहिनबिम्बसम क

भ्रूभङ्गविभ्रमविलासनि[रीक्षि](f 44b तानि
कोपप्रसादहसितानि कुतः शशाङ्के[3] ॥

२४७

तावज्जरामरणबन्धुवियोगशोक
संवेगभिन्नमनसामपवर्गवाञ्छा ।
यावन्न वक्रगतिरञ्जननीलरोचि
रेणीदृशां दशति लोचनदन्दशूकः ॥

२४८

[सा ये]दृष्टा न[1] वा दृष्टा मुषिताः सममेव ते ।
हृतं हृदयमेकेषामन्येषां चक्षुषः[2] फलम् ॥

Fm n ff see below

२४९

सा बालेति मृगेक्षणेति विकसत्पद्मानेति क्रम
प्रोन्मीलत्कुचकुड्मलेति हृदयं[2] त्वां [धिग्] वृथा भ्राम्यसि ।
मायेयं मृ[ग]तृष्णिकास्वपि पयः पातुं समीहा तव
त्यक्तव्ये पथि मा कृथाः पुनरपि प्रेमप्रमादास्पदम् ॥

धर्मकीर्त्तेः ॥

---

२४६ [1] *Śp*, *S-Ślokāh*, *S-Hārāv* °कटाक्ष, *S-Mukt* भ्रूक्षेपवि-
क्षितकटाक्ष [2] *S-Ratnak* °क्षणा [3] *S-Mukt* कुतस्तु चन्द्रे

२४७ [1] MS ङ्ग

२४८ **Skm* II 494 (कस्यचित्) *Sbhv* 1254 (शक्रदेवस्य) *Śp* 3368 (प्रभाकरदेवस्य) **Sml P* 65*b* (प्रभाकरदेवस्य) Hemac p 256 Comm (anon) [1] *Sbhv*, *Śp* सा दृष्टा यैर्न, *Sml P* continues दृष्टा वा, Hemac has यैर्दृष्टा सा न वा [2] Hemac जन्मन'

२४९ [1] MS धा [2] MS य [3] MS °दृ

२५०

*Skm II 39 (कालिदासस्य) Sbhr 2052

अवचनं वचनं प्रियसंनिधा[1]
वनवलोक[नमवे विलोक]नम् ।
अवयवावरणं च यदञ्चलं[2]
नकरेण तदङ्गसमर्पणम् ॥

२५१

मीलिता चलति नो[1] दृष्टिः कपोलस्थले
योधिपङ्कपतनान्निश्चेष्टमास्ते गतम् ।
गता इव पुनस्त्रांसान्निवृत्ता इव
हो गतागतममी कुर्वन्त[4] एवासते ॥

२५२

सरोजमिदं क्व निशि प्रभा
निशा[प]तिरह्नि कुतो नु सः ।
तोभयधर्मि तवाननं
टितं[1] विधिना बहु नैपुणम् ॥

२५३

नमुखे मयि संहृतमीक्षितं
तमन्यनिमित्तकथोदयम् ।
यवारितवृत्तिरतस्तया
त्रवृतो मदनो न च संवृतः ॥

Śp गुरु [2] Sbhr, Śp °णं हि यदंशुक

[2] MS ष्ट (sta) [3] MS स्ता. [4] MS न्तु or न्त

मृ (cf d) [2] MS नी [3] MS °से (si) च

२५४

को ऽसौ कृती कथय को मदनैकबन्धु
रुद्ग्रीवमर्चयसि कस्य मृगाक्षि मार्गम् ।
नीलाब्जकर्वुरितमध्यविनिद्रकुन्द
दामाभिरामरुचिभिस्तरलैः कटाक्षैः ॥

२५५

गुरुणा स्त[नभारेण] . . . .
. . . .

Bhartrhari I 16
Sbhā 1233, 1234
*Smv P 82b
*S-Hāra C 207 (anon.)

२५६

[प्रणालीदीर्घस्य प्रतिपदमपाङ्ग](fol 46a)स्य सुहृदः
कटाक्षव्याक्षेपाः शिशुशफरफालप्रतिभुवः ।
स्तुवानाः[1] सर्वस्वं कुसुमधनुषो ऽस्मान् प्रति सखे
नवं नेत्राद्वैतं कुवलयदृशः संनिदधति ॥

Viddhaś IV 14
*Skm II 60
(राजशेखरस्य)

२५७

भवनभुवि सृजन्तस्तारहारावतारा
न्दिशि दिशि विकिरन्तः[1] केतकानां कुटुम्बम् ।
वियति विरचयन्तश्चन्द्रिकां दुग्धमुग्धां[2]
प्रतिनयननिपाताः सुभ्रुवो विभ्रमन्ति ॥

Viddhaś IV 13
*Skm II 463
(राजशेखरस्य)

---

२५६ [1] MS स्तु, *Viddhaś* सु, *Skm* सुधाया.
२५७ [1] *Skm* °दिश्न [2] *Skm* मु

२५८

Skm II (कालिदासस्य) Skm 2 (वामभि...) 3

यत्पश्यन्ति झगित्यपाङ्गसरणिद्रोणीजुषा चक्षुषा
रिङ्खन्ति क्रमदोलितोभयभुजं यन्नाम वामभ्रुवः।
भाषन्ते च यदुक्तिभिः[2] स्तवकितं वैदग्ध्यमुद्रात्मभि
स्तद्देवस्य रसायनं रसनिधेर्मन्ये मनोजन्मनः॥

२५९

Viddhaś III 3 *Skm II 461 (कालिदासस्य)

क्रमसंरलितकण्ठ[2]प्रक्रमोल्लासितोर
स्त[3]रलितबलिलेखा[4]सूचसर्वस्वमस्याः।
स्थितमतिचिरमुच्चैरग्रपादाङ्गुलीभिः
करकलितसखीकं मां दिदृक्षोः स्मरामि॥

२६०

Viddhaś II 10 Skm II 354 (कस्यचित्)

स्मरशरधि[1]संकाशं कर्णपा[2]शं कृशाङ्गी
रयविगलितताडीपत्त्र[3]तातङ्क[4]मेकम्।
वहति हृदयचौरं कुङ्कुमन्यासगौरं[5]
वलयितमिव नालं लोचनेन्दीवरस्य॥

२६१

For reff see below

चो[1]लाञ्चले[2]न चलहारलताप्रकाण्डे
वेणी[3]गुणेन च बलाद्वलयीकृतेन।

---

२५८ [1] MS वि ? [2] MS भि

२५९ [1] MS ग्र [2] Skm ण्ठं [3] Skm °तार त [4] Skm रे

२६० [1] Skm, Viddhaś नि [2] MS या [3] MS °यन्त [4] MS ड ? [5] Skm घो

२६१ Viddhaś II 9 *Skm II 393 *Sml P 105b *Sml B 131b *Saml 273 (anon) Śp 3912 (कस्यापि) *Sūktiratn 421 (anon) Padyarac IX 36 (anon) [1] Viddhaś, Skm, Sml B, Saml, Śp, Padyarac चे, Sūktiratn चै [2] MS ल [3] MS णा [4] Padyarac चलद्द

हेलाहितभ्रमरकभ्रममण्डलीभि
श्छन्नचयं रचयतीव चिरं नतभ्रुः ॥

२६२

अमन्दमणिनूपुरक्वणनचारुचारीक्रमं
झणज्झणितमेखलास्खलिततारहारच्छटम् ।
इदं तरलकङ्कणावलिविशेषवाचालितं
मनो हरति सुभ्रुवः किमपि कन्दुकक्रीडितम् ॥

Im ... see

२६३

सा दुग्धमुग्धमधुरच्छविरङ्गयष्टि
स्ते लोचने तरुणकेतक(fol 46b)पत्त्रदीर्घे ।
कम्बोर्विडम्बनकरश्च स एव कण्ठः
सैवेयमिन्दुवदना मदनायुधाय ॥

Viddhaś I 38

२६४

क्व पातव्या ज्योत्स्नामृतभवनगर्भापि तृषितै
र्मृणालीतन्तुभ्यः सिचयरचना कुत्र घटते ।

Viddhaś I 20
*Skm II 474
Sarasvatīk ad II 52 (anon)

२६१ [1] *Skm* स्वेच्छा [2] *Skm* also मि [3] MS न्त, *Sūktiratn* °स्त्र (?)

२६२ *Viddhaś* II 6 **Skm* II 391 *Śp* 3929 (कस्यापि) **Sml P* 105b (anon) **Saml* 281 (anon) **S-Mukt* IV 19 (anon) **Sūktiratn* 420 (anon) [1] *Skm* °प्रचुर, *S-Mukt* °क्वणित [2] *Viddhaś* also रि and र, *S-Mukt* °चामीकर [3] *Sml P* °माज्झ, *S-Mukt* reads रणध्वनितमेखलोच्छलितचारु°, *Sūktiratn* समस्तनितमेखलास्फुरिततार° [4] MS तां [5] *Viddhaś* °डन, MS °दित (*sic*)

२६३ [1] MS °यन्त [2] MS च [3] *Viddhaś*. °धं या and °धं वा

२६४ [1] MS का [2] *Skm* क्व पेयं ज्योत्स्नाभो वदत बिस वल्लीसरणिभिः, so *Sarasvatīk* with variants वदत and °न [3] MS प [4] *Viddhaś*, *Skm* भवतु, *Sarasvatīk* भवति

क्क वा पारीमेयो वत वकुलदाम्नां परिमलः
कथं स्वप्नः साक्षात्कुवलयदृशं कल्पयतु[1] ताम् ॥

राजशेखरस्वामी ॥

२६५

*Skm (क ... म

SkTr ... see below

रसवदमृतं[1] कः संदेहो मधून्यपि नान्यथा[2]
मधुरमपि किं[3] चूतस्यापि प्रसन्नरसं[4] फलम् ।
सकृदपि पुनर्मध्यस्थः सन् रसान्[5]तरविज्जनो
वदतु यदि हान्यत्स्वादु स्यात्प्रियादशनच्छदात् ॥

२६६

Vāmana IV 3, 22 (anon)

कुवलयवनं प्रत्याख्यातं नवं मधु निन्दितं
हसितममृतं हन्त स्वादोः परं रससंपदः[1] ।
विषमुपहितं चिन्ताव्याजान्मनस्यपि कामिना
मलसमधुरैर्लीलातन्वैस्तयार्धविलोकितैः ॥

२६७

*Sml P 105a (राजशेखरस्य) *Sml B 130b (,,) *Saml 280 (anon)

चञ्चच्चोला[1]ञ्चलानि प्रतिसरणरयव्यस्तवेणीनि बाहो
र्विक्षेपाद्दक्षिणस्य प्रचलितवलयास्फालकोलाहलानि ।

---

२६४ [1] MS म्म

२६५ *Skm II 626 (कस्यचित्) Sbhv 1511 (कस्यापि) Vāmana III 2, 10 (anon) Sarasvatīk ad I 83 (anon) Hemac p 148 (anon) *S-Hārāv C 60 (anon) Kāvyapr ad VII 7 (anon) Kāvyaprad ad VII 7 (anon) [1] Hemac, Kāvyapr, Kāvyapr ad अमृतम [2] S-Hārāv. मधुनि (sic) मधून्यथो [3] Sbhv, Hemac °थ किः, Skm, Vāmana, Sarasvatīk, S-Hārāv, Kāvyapr, Kāvyapr ad. °धिक [4] MS स, S-Hārāv द्राघायाश्च प्रसन्नतर [5] Skm स एवा [6] Sbhv °स्त्वन्यत्स्वादु

२६६ [1] Vāmana रसेषु निराकृतः [2] Vāmana °ना चतुर [3] MS ग्वि

२६७ [1] Saml लोलद्वे [2] Sml क

श्वासत्रुट्यद्वचांसि द्रुतमितरकरोत्क्षिप्तलोलालकानि
स्रस्तस्रञ्जि प्रमोदं दधति मृगदृशां कन्दुकक्रीडितानि ॥

२६८

प्रहरविरतौ मध्ये वाह्नस्ततो ऽपि परेण वा
किमुत सकले याते ऽप्यह्नि त्वमद्य समेष्यसि ।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालालापैः सबाष्पझलज्झलैः ॥

F, ref see below

२६९ झलज्झलस्य ॥

कल्याणं परिकल्पतां पिककुले रोहन्तु वाञ्छाप्रयो
हंसानामुदयो ऽस्तु पूर्णशशिनः स्तान्द्रमिन्दीवरे ।
इत्युद्बाष्पवधूगिरः प्रति (fol 47a) पदं संपूरयन्त्यान्तिके
कान्तः प्रस्थितिकल्पितोपकरणः सख्या भृशं वारितः ॥

२७० शृङ्गारस्य ॥

सामान्यवाचि पदमप्यभिधीयमानं
मां प्राप्य जातमभिधेयविशेषनिष्ठम् ।
स्त्री काचिदित्यभिहिते हि मनो मदीयं
तामेव वामनयनां विषयीकरोति ॥

---

२६७ [1] *Sml* ॰त्क्षेप

२६८ **Skm* II 446 (अमरोः) *Sbhr* 1048 (झलज्झलिकावासुदेवयोः) *Śp* 3389 (गलज्जलवसुदेवस्य) **Sml B* 61*b* (गलज्जलवसुदेवस्य) Amaru, 12 *Daśar ad* IV 59 (अमरुशतके) *Citram* p 4 (anon) *Citrakh* p 5 (anon) **Sabhyāl B* B 1*a* (अमरुकस्य) [1] *Śp*, *Sabhyāl* ह्य [2] *Daśar* ऽथ [3] *Skm*, *Sbhr*, Amaru वा, *Sabhyāl* चा, *Daśar* has दिनदलति गते वास्त नाथ त्वमद्य समेष्यसि, *Citram*, *Citrakh*, *Sabhyāl* प्रिय त्वमिहैष्यसि [4] MS पि [5] Amaru, *Śp*, *Daśar*, *Sabhyāl* ॰गलज्ज

२६९ [1] MS ते (*ti*)

॥ दूतीवचनव्रज्या ॥

२७१

*Skm II 142

लावण्येन पिधीयते ऽङ्गतनिमा संधार्यते जीवितं
त्वद्ध्यानैः सततं कुरङ्गकदृशः किंत्वेतदास्ते नवम्।
निःश्वासैः कुचकुम्भपीठलुठनप्रत्युद्गमान्मांसलैः
श्यामीभूतकपोलमिन्दुरधुना यत्तन्मुखं स्पर्धते ॥

२७२

*Skm II 172
Śp 3488
(कस्यापि)

सोद्वेगा[1] मृगलाञ्छने मुखमपि स्वं नेक्षते दर्पणे
त्रस्ता कोकिलकूजितादपि गिरं नोन्मुद्रयत्यात्मनः।
चित्तं दुःसहदाहदायिनि धृतद्वेषापि पुष्पायुधे
बाला[8] सा सुभग त्वयि[9] प्रतिपदं[10] प्रेमाधिकं पुष्यति ॥

शृङ्गारस्यैतौ ॥

२७३

For reff see below

विलिम्पत्येतस्मिन्मलयजरसार्द्रेण महसा
दिशां चक्रं चन्द्रे सुकृतमयं तस्या मृगदृशः।
दृशोर्बाष्पः पाणौ वदनमसवः कण्ठकुहरे
हृदि त्वं ह्रीः पृष्ठे वचसि च गुणा एव भवतः ॥

---

२७१ [1] MS हु [2] MS °न्सान्स [3] MS ते

२७२ [1] Śp नीरागा [2] MS न्र [3] Skm, Śp जि [4] MS °त्मद्व [5] Skm दृत्य [6] MS हा with the vowel erased [7] MS here inserts ཆ four times [8] Skm मुग्धा [9] Śp °गंप्रति [10] Skm मुहुः

२७३ *Skm II 146 (अ(प्र)चलसिंहस्य) Sarasvatīk ad v 167 (133) (anon.) *Sml B 77b (राजशेखरस्य) [1] Sarasvatīk य [2] MS वा

२७४

अम्भोरुहं वदनमम्बकमिन्दुकान्तः
पाथोनिधिः कुसुमचापभृतो विकारः ।
प्रादुर्बभूव सुभग त्वयि दूरसंस्थे
चण्डालचन्द्रधवलासु निशासु तस्याः ॥

*Skm II 177 (चण्डालचन्द्रस्य)

२७५

वक्त्रेन्दोर्न हरन्ति बाष्पपयसां धारा मनोज्ञां श्रियं
निश्वासा न कदर्थयन्ति मधुरां बिम्बाध[र]स्य द्युतिम् ।
तस्यास्त्वद्विरहे वि(fol 47b)पक्वलवलीलावण्यसंवादिनी
छाया कापि कपोलयोरनुदिनं तन्व्याः परं शुष्यति ॥

धर्मकीर्त्तेः ॥

*Skm II 141

२७६

तापो ऽम्भःप्रसृतंपचः प्रचयवान् बाष्पः प्रणालोचितः
श्वासा नर्तितदीपवर्तिलतिकाः पाण्डिम्नि मग्नं वपुः ।
किं चान्यत्कथयामि रात्रिमखिलां त्वद्वर्त्मवातायने
हस्तच्छत्रनिरुद्धचन्द्रमहसस्तस्याः स्थितिर्वर्तते ॥

Viddhaś II 21
Sbhi 1411
Aś p 68 (anon)
Citram p 103 (anon)

२७७

चन्द्रं चन्दनकर्दमेन लिखितं सा[1] मार्ष्टि दष्टाधरा
बन्ध्यं[2] निन्दति यच्च मन्मथमसौ भङ्गाग्रहस्ताङ्गुरीः ।

Viddhaś II 20
*Skm II 148
*Sml B 77b
(नन्दनस्य)

---

२७४ [1] MS त्व (?)

२७५ [1] MS क्त्रो

२७६ [1] The other texts have दाहो॰ ॰तिं [2] MS ष्प [3] Viddhaś कम्पि, the other texts have प्रेङ्खितदीप्र(Citram प्र)दीप [4] Viddhaś also ॰कलि; so Alamkāras and Citram [5] MS ग्नं [6] Viddhaś त्वन्मार्ग or तन्मार्ग, the other texts त्वन्मार्ग

२७७ [1] Viddhaś सं [2] Skm. न्धं, Viddhaś न्धं and न्ध

कामः पुष्पशरः किलेति सुमनोवर्गं लुनीते च य
त्त्काम्या[2] सुभग त्वया वरतनुर्वातूलतां लम्भिता ॥

राजशेखरस्य ॥

२७८

वपुः शारङ्गाक्ष्यास्तदविरलरोमाञ्चनिचयं
त्वयि स्वप्नावाप्ते स्नपयति परः[1] स्वेदविसरः ।
बलाकर्षैत्रुट्यद्वलयजकटुत्कारनिनदै
र्विनिद्रायाः पश्चादनवरतबाष्पाम्बुनिवहाः ॥

वसुकल्पस्य ॥

२७९

नो शक्या गदितुं स्मरानलदशा यास्यास्त्वयि प्रस्थिते
पत्त्रैः साश्रु[1]सखीजनोपरचिते तल्पे लुठन्त्या मुहुः ।
यल्लिप्तं कुचचन्दनेन सुतनोरद्यापि चन्द्रस्थला
च्छ्वासोड्डीनविशुष्कपाण्डुबिसिनीपत्त्रं दिवि भ्राम्यति ॥

रुद्रस्य ॥

२८०

Sbhv 1382 (कस्यापि)

प्रकटयति क्षणभङ्गं पश्यति सर्वं जगद्गतं शून्यम् ।
आचरति स्मृतिबाह्यं जाता सा बौद्धबुद्धिरिव ॥

**Skm* II 143 (कस्यचित्) *Sbhv* 1393 (कस्यापि)

२८१

त्वदर्थिनी चन्दनभस्मदिग्ध[1]
ललाटलेखाश्रुजलाभिषिक्ता ।

---

२७७ [1] *Viddhaś* transposes lines 2 and 3 of this verse [2] *Viddhaś* °त्काम and °त्कालं

२७८ [1] MS here inserts a । [2] MS त्त्रु

२७९ [1] MS सु [2] MS य

२८० [1] MS °तग for °द्ग

२८१ [1] *Sbhv* ग्धा

मृणालचीरं दधती स्तनाभ्यां
स्मरोपदिष्टं चरति व्रतं सा ॥

२८२

ये निर्दहन्ति दशनश्वसितावलोकैः
क्रूरद्विजिह्वकुटिलाः क्व विलासिनस्ते ।
(fol 48a) भीष्मोष्मभिः स्मरणमात्रविषैस्त्वमेव
मव्याल मारयति कापि भुजङ्गभङ्गिः ॥

Sūkt 1400 (भट्टवासुदेवस्य)

२८३

स्वेदापूरविलुप्तकुङ्कुमरसाश्लेषाविलप्रच्छदा
तल्पाद्व्यक्तमनोभवानलशिखालीढादिवाशङ्किता ।
सा बाला बलवन्मृगाङ्ककिरणैरुत्पादितान्तर्ज्वरा
त्वत्संकल्पजडे त्वदङ्कशयने निद्रासुखं वाञ्छति ॥

२८४

धूमेनेव हते दृशौ विसृजतो बाष्पं प्रवाहक्षमं
क्वाथोत्फेनमिवात्तचन्दनरसं स्वेदं वपुर्मुञ्चति ।
अन्तःप्रज्वलितस्य कामशिखिनो दाहार्जितैर्भस्मभिः
श्वासावेगविनिर्गतैरिव तनोः पाण्डुत्वमुन्मीलति ॥

मनोविदर्शितौ ॥

---

२८१ [1] MS य
२८२ [1] MS स्व
२८३ [1] MS द्दे (di), followed by य deleted [2] MS ने (ni)
२८४ [1] MS वै [2] MS स्वे,

२८५

अत्रैव स्वयमेव चित्रफलके कम्पस्खलल्लेखया
संतापार्त्तिविनोदनाय कथमप्यालिख्य सख्या भवान् ।
बाष्पव्याकुलमीक्षितः सरभसं चूताङ्कुरैरर्चितो
मूर्ध्ना च प्रणतः सखीषु मदनव्याजेन चापह्नुतः ॥

बिम्बोकस्य ॥

२८६

सा सुन्दरी तव वियोगहुताशने ऽस्मि
न्नभ्युक्ष्य बाष्पसलिलैर्निजदेहहव्यम् ।
जन्मान्तरे विरहदुःखविनाशकामा[1]
पुंस्कोकिलाभिहितमन्त्रपदै[2]र्जुहोति ॥

प्रभाकरस्य ॥

२८७

सुभग सुकृतप्रायो यद्यप्यसि त्वमसावपि
प्रियसहचरी नाधन्यानामुपैति विधेयताम् ।
तदलमधुना निर्बन्धेन प्रसीद परस्परं
प्रणयमधुरः सद्भावो वां चि ‾ धेताम् ॥

वाक्कूटस्य ॥

२८८

*Skm II 166 (राजशेखरस्य)

दोलालोलाः श्वसनमरुतश्चक्षुषी निर्झराभे[1]
[2]तस्याः शुष्य[3]त्तगरसुमनःपाण्डरा (fol 48b)गण्डभित्तिः ।

---

२८५ [1] MS सु

२८६ [1] MS नां [2] MS here inserts ङ three times

२८८ [1] Skm also (A) ञे [2] Skm A here inserts भो ? a correction (for भे) of the preceding ञे [3] MS तु

तन्नाचाणां किमिव हि वयं[1] ब्रूमहे दुर्बलत्वं
येषामग्रे प्रतिपदुदिता चन्द्रलेखाप्यतन्वी[2] ॥

२८९

तस्यास्तापभुवं[1] नृशंस कथयाम्येणीदृशस्ते कथं
पद्मिन्याः सरसं दलं[2] विनिहितं यस्याः शमायोरसि[3] ।
आदौ शुष्यति संकुचत्यनु ततश्चूर्णत्वमापद्यते
पश्चान्मुर्मुरतां दधद्दहति च श्वासावधूतं सखीम्[4] ॥

उत्पलराजस्य ॥

*Sml P 68b (कस्यापि)
*S-Hārāv C 408 (anon)

२९०

विषं चान्द्रालोकः[1] कुमुदवनवातो हुतवहः
क्षतक्षारो हारः[2] [स खलु पुटपाको मलयजः ।
अये किंचिद्वक्रे त्वयि सुभग सर्वे कथममी
समं जातास्तस्यामहह विपरीतप्रकृतयः ॥

*Skm II 173 (अचलसिंहस्य)

२९१

त्वां चिन्तापरिकल्पितं सुभग सा संभाव्य रोमाञ्चिता
शून्यालिङ्ग]नसंवल[1]द्भुजयुगेनात्मानमालिङ्गति ।
किं चान्यद्विरहव्यथाप्रणयिनी[2] संप्राप्य मूर्छां चिरा
त्प्रत्युज्जीवति कर्णमूलपठितैस्त्वन्नाममन्त्राक्षरैः ॥

*Skm II 156 (कस्यचित्)
Śp 3487 (कस्यापि)

---

२८८ [1] *Skm* बद्ध [2] MS त्वी

२८९ [1] *Sml P*, *S-Hārāv* °महं, see exegetical note [2] *Sml P* °मब्ज [3] *Sml P* सतापो [4] *Sml P* खी, *S-Hārāv* खीः

२९० [1] *Skm* द्य [2] Here parts of two verses are omitted, I give the text of *Skm*

२९१ [1] *Śp* च [2] *Śp* °श्रम.

२९२

गाढावधःकृतबलिचितयौ सुसंङ्गौ
तुङ्गौ स्तनाविति तयोस्तलमागात्[1]।
तस्याः स्फुटं हृदयमित्यपि न स्मरेषू
न्तौ रक्षतः प्रविशतो विमुखो ऽथ वा त्वम्[2] ॥

वल्लणस्य ॥

२९३

*Skm II 162 (वाचस्पतेः) Daśar ad II 27 (anon) *Saml 103 (anon)

मृगशिशुदृशस्तस्या[स्ता]पं कथं कथयामि ते
दहनपतिता दृष्टा मूर्त्तिर्मया न हि वैधवी[1]।
इति तु नियतं नारीरूपः स लोकदृशां[2] प्रिय[3]
स्तव शठतया[5] शिल्पोत्कर्षो विधेर्विघटिष्यते ॥

२९४

*Skm II 158

पुनरुक्तावधि वासरमेतस्याः कितव पश्य गणयन्त्याः।
इयमिव करजः[1] क्षीणस्त्वमिव कठोराणि पर्वाणि ॥

धरणीधरस्य

---

२९२ [1] MS स [2] MS च

२९३ [1] *Daśar*, *Saml* विद्धि [2] MS ग्रा [3] *Daśar*, *Saml* सुधा [4] MS स (?) [5] *Skm* था

२९४ [1] *Skm* A ज

॥ संभोगव्रज्या ॥

२९५

प्रौढप्रेमरसान्नितम्बफलकाद्विस्रंसिते ऽप्यंशुके
काञ्चीदाममणिप्रभाभिरनु चारब्धे दुकूलान्तरे ।
कान्तेनाशु सुधाविलोकितमथो तन्व्या मुधा लज्जि .
. . . . ॥

२९६

[कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धना
द्वासश्च श्लथमेखलागुणधृतं किंचिन्नितम्बे स्थितम् ।
एतावत्सखि वेद्मि केवलमहो तस्याङ्गसङ्गे पुनः
को ऽसौ कास्मि रतं च किं सखि शपे स्व] (fol 50*a*)
ल्पापि मे न स्मृतिः ॥

For ref see below

विकटनितम्बायाः ॥

---

२९५ [1] MS श्रं [2] MS ति [3] *Sic* MS (for शुचा ? cf 326, *c*) [4] MS थौ

२९६ **Skm* II 696 *Sbhv* 2147 (अमरुकस्य) **Sml P* 125*a* (अमरुकस्य) Amaru, 101 *Sarasvatīk ad* V 150 (anon) *Daśar ad* II 17 (anon) *Rasamañjarī* 15 *Vetālap* p 49 Hemac p 94 (anon) **S-Mukt* I 92 (anon) **S-Ślokāh* 8*a* (anon) [1] *Rasam*, *S-Ślokāh* तत्क्षणा [2] *Sbhv*, Hemac, *Rasam*, *S-Ślokāh* तद्वासः, *Daśar* वास. प्र, Amaru, *S-Mukt*, *Vetālap* वासो वि [3] *Sbhv* °लं कर [4] *Sml P* ष्मि (?) [5] *Sbhv*, *Daśar*, *Rasam*, *Sml P*, *S-Mukt* ह्, Amaru, Hemac साम्प्रतमह, *Vetālap* वेद्म्यह रसवसात् [6] *S-Mukt* क्का [7] *Sbhv*, Amaru नु वा कथमिति, *Daśar* नु किं कथमिति, *Rasam*, Hemac तु कि कथमिति, *Vetālap* तु वा कथमिति, *S-Mukt* नु कि कथमपि, *S-Ślokāh* तु°

२९७

अतिप्रौढी[1] रात्रिर्बहल[2]शिखदीपः प्रभवति
प्रियः प्रेमारब्ध[3]स्मरविधिरसज्ञः परमसौ ।
सखि स्वैरं स्वैरं सुरतमकरोद्व्रीडितवपु
र्यतः पर्यङ्को[4]ऽयं रिपुरिव कटुत्कार[5]मुखरः ॥

२९८

For reff see below

धन्यासि यत्क[1]थयसि प्रियसंगमेन[1]
नर्मस्मितं च वचनं च रसं च तस्य[2] ।
नीवीं प्रति प्रणिहिते तु करे[3] प्रियेण
सख्यः[4] शपा[5]मि यदि किंचिद[पि] स्मरामि ॥

विद्यायाः ॥

२९९

जयति समरतान्तान्दोलनापाण्डुगण्ड
स्थलकृतनिजवासस्वेदपूरानुजन्मा ।
श्लथतनुभुजबन्धप्राप्तदीर्घप्रसारो
मुखपरिमलमुग्धः कान्तयोः श्वासवातः ॥

---

२९७ [1] MS प्रो [2] MS व [3] Read ब्ध. ? [4] MS ङ्कौ [5] MS °वड(or ड ?)त्का

२९८ *Skm II 697 Sbhv 2142 (कस्यापि) Śp 3746 (विज्जकायाः) *Kāvyapr ad* IV 40 (anon) *Sāhıtyad* pp 41–2 (anon). *Ak* p 166 (anon) *Kāvyaprad ad* IV 18 (anon). Arjunavarman *ad* Amaru 101 (anon) **S-Ratnak* v 188 (anon) **S-Prabandha* 55 (anon) [1] The other texts have या कथ° (except *S-Prabandha* मा°) and °मेऽपि [2] *Śp* नर्मोक्तिचाटुकशतानि रतान्तरेषु, *Sbhv*, *Kāvyapr*, *Sāhıtyad*, *Ak*, *S-Ratnak*, *Kāvyapr ad*, *S-Prabandha* विस्रब्धचाटुक° [3] *Sbhv* °हितश्च कारः [4] *Sbhv* सखी [5] MS या

२९९ [1] MS ग्ल

३००

मनोजन्मप्रौढव्यतिकरशतायासविधिषु
प्रियः प्रायो मुग्धो झगिति[1] कृतचेतोभवविधिः ।
सहूंकारोज्जृम्भा स्मरपरवशा कान्तविमुखं
मुखं[2] मुग्धापाङ्गा[3] क्षिपति विरसप्रौढयुवती ॥

३०१

नवनवरहोलीलाभ्यासप्रपञ्चितमन्मथ
व्यतिकरकलाकल्लोलान्तर्निमग्नमनस्कयोः ।
अपि तरुणयोः किं स्यात्तस्यां दिवि स्पृहयालुता[1]
मुकुलितदृशोरुज्झिद्यन्ते न चेद्विरहत्विषः ॥

३०२

तस्यापाङ्गविलोकितस्य मधुरप्रोल्लासितार्धभ्रुव
स्तस्य स्मेरशुचेः क्रमस्य च गिरां मुग्धाक्षराणां ह्रिया ।
भावानामपि तादृशां मृगदृशो हावानुगानामहो
नाधन्यः कुरुते प्ररूढपुलकैरातिथ्यमङ्गैर्जनः ॥

मनोविनोदस्य(fol 50b)तौ ॥

३०३

समाकृष्टं वासः कथमपि हठात्पश्यति मयि[1]
क्रमादूरुद्वंद्वं जरठशरगौरं मृगदृशः ।
तया दृष्टिं दत्त्वा[2] महति मणिदीपे निपुणया
निरुद्धं हस्ताभ्यां झगिति मम[3] नेत्रोत्पलयुगम् ॥

Śp 3677 (कस्यापि)
**Sabhyāl* IV 124 (कस्यापि)

---

३०० [1] MS ते (*ti*) [2] MS खा [3] MS ङ्ग

३०१ [1] MS ल

३०३ [1] MS पि, *Śp* reads तदा, so also *Sabhyāl* . [2] MS त्वौ (corrected ?), *Sabhyāl* छ(?)त्वा [3] *Śp* निज, so *Sabhyāl* [4] MS चौ (corrected ?)

३०४

अनल्पं संतापं शमयति मनोजन्मजनितं
तथा शीतं स्फीतं हिमवति निशीथे ग्लप[1]यति ।
तदेवंको ऽप्यूष्मा रमणपरिरम्भोत्सवमिल
त्पुरन्ध्रीनीरन्ध्र[2]स्तनकलशजन्मा विजयते ॥

३०५

*Skm II 667 (सोह्नोकस्य)

ना[1]धन्यान्विपरीत[2]मोहनर[स]प्रेङ्खन्नितम्बस्थली
लालङ्घू[3]षणकिङ्किणीकलरवव्यामिश्रकण्ठस्वनम् ।
सं[4]रम्भ[5]श्लथकेशबन्धविगलन्मुक्ताकलापद्रुत[6]
श्वा[7]सच्छेदतरङ्गितस्तनयुगं प्रीणाति शृङ्गारिणी ॥

सोनोकस्य ॥

३०६

*Skm II 694 (कस्यचित्)

शीत्कारवन्ति दरमीलितलोचनानि
रोमाञ्चमुञ्चि तनुघर्मकणावलीनि ।
एणीदृशां मकरकेतुनिकेतनानि
वन्दामहे सुरत[1]विभ्रमचेष्टितानि ॥

३०७

मुहुर्व्रीडावत्याः प्रतिहसितवत्याः प्रतिमुहु
र्मुहुर्विश्रान्ताया मुहुरभिनिविष्टव्यवसितेः ।
श्रमाम्भोभिस्तिम्यत्तिलकमलि[1]काघूर्णदलकं
मुखं लीलावत्या हरति विपरीतव्यतिकरे ॥

सुरभेः ॥

---

३०४ [1] Or श्लथ ? [2] MS न्ध्र ?

३०५ [1] MS मा [2] *Shm* also (A) परिवी [3] *Shm* also (A) °लभू [4] MS स [5] *Shm* also (A) भा [6] *Shm* त्रुट [7] *Skm* च्छ्वा

३०६ [1] Corrected from ति

३०७ [1] MS ले (*h*)

३०८

आस्तां दूरेण विश्लेषः प्रियामालिङ्गतो[1] मम ।
स्वेदः किं न सरिन्नाथो[2] रोमाञ्चः किं न पर्वतः ॥

Sbh 2087 (कस्यापि) Śp 3679 (,,)

३०९

[1]चिरारूढप्रेमप्रणयपरिहासेन हृतया
तदारब्धं[2] तन्व्या न तु यदबलायाः समुचितम् ।
अनिर्व्यूढे[3] तस्मिन् प्रकृतिसुकुमाराङ्गलतया
पुनर्लज्जालोलं मयि विनिहितं लोचनयुगम् ॥

*Shm II 675 (कोकस्य) Sbhv 2129 (कस्यापि)

३१०

नखदशननिपातजर्जराङ्गा
रतिक(fol 51a)लहे परिपीडिता प्रहारैः ।
सपदि मरणमेव सा तु[1] याया
द्यदि न पिबेदधरामृतं प्रियस्य ॥

Sbhv 2126 (क्षेमेन्द्रस्य)

३११

मुग्धे तवास्मि दयिता दयितो[1] भव त्व
मित्युक्तया न हि न हीति शिरोऽवधूय ।

For reff see below

---

३०८ [1] MS ङ्गि [2] MS °रिना

३०९ [1] *Shm* reads *a–b*

पुरारूढप्रेमप्रबलरसरागेण कृतया
समारूढ कर्तुं न हि यदबलाभावसदृशम् ।

[2] MS °दयात्त [3] MS व्यू.

३१० [1] *Sbhv* यदिह मरणमेव किं न, MS त्त for तु ?

३११ *Sbhv* 2128 (शशिवर्धनस्य) *Śp* 3699 (कस्यापि) **Sml P* 119*a* (कस्यापि) **Saml* 187 (anon). **Sabhyāl* IV 162 (anon)
[1] *Śp*, *Sml P*, *Saml*, *Sabhyāl* पुरुषो.

स्वस्मात्करान्मम[2] करे वलयं क्षिपन्त्या
वाचं विनाभ्युपगमः कथितो मृगाक्ष्या ॥

३१२

Sbhv 2120
Śp 3695
*Sml B 147b

पततु तवोरसि सततं दयिताधम्मिल्लमल्लिकाप्रकरः ।
रतिरसंरभसकचग्रहलुलितालकवल्लरीगलितः ॥

बाणस्य ॥

३१३

*Skm II 676
(राजशेखरस्य)

आवृण्वाना झगिति जघनं मद्दुकूलाञ्चलेन
प्रेङ्खन्क्रीडाकुलितकवरीबन्धनव्यग्रपाणिः ।
अर्धोच्छ्वासस्फुटनखपदालंकृताभ्यां स्तनाभ्यां
दृष्टा धार्ष्ट्यस्मृतिनतमुखी मोहनान्ते मया सा[5] ॥

अभिनन्दस्य ॥

३१४

हरति रतिविमर्दे लुप्तपत्त्राङ्कुरत्वा
त्प्रकटनखपदाङ्कः किं च रोमाञ्चमुद्रः ।
हरिणशिशुदृशो ऽस्या [मुग्ध]मुग्धं हसन्त्याः
परिणतशरकाण्डस्निग्धपाण्डुः कपोलः ॥

वीर्यमित्रस्य ॥

---

३११ [1] Sbhv स्व स्वा [2] Śp, Sml P, Saml °त्प्रिय, Sabhyāl °त्प्रियतमे [3] MS न्त्य corrected (?) [4] Sabhyāl प्यु

३१२ [1] Śp नि [2] Śp त [3] Sbhv ण [4] Inserted by revisor of MS [5] Sbhv °पति

३१३ [1] Skm टि [2] MS ने [3] Skm प्रेङ्खल्लीलालुलि [4] Skm धार्ष्ट्यादवनत°, MS दा for धा [5] Skm सा मया मोहनान्ते

३१५

For reff see below

करकिशलयं धूत्वा धूत्वा विमार्गति वाससी
क्षिपति सुमनोमालाशेषं प्रदीपशिखां प्रति ।
स्थगयति करैः[1] पत्युर्नेत्रे[2] विहस्य समाकुला
सुरतविरतौ रम्या तन्वी मुहुर्मुहुरीक्षितुम्[3] ॥

३१६

विश्रान्तिं नूपुरे याते[1] श्रूयते रसना[2]ध्वनिः ।
प्रायः कान्ते[3] रति[4]श्रान्ते कामिनी पुरुषायते ॥

Śp 3696 (कस्यापि)
**Sabhyāl* IV 161 (,,)

३१७

भावोद्गाढमुपोढकम्प[1]पुलकैरङ्गैः समालिङ्गितं
रागाच्चुम्बितमभ्यु[2]पेत्य वदनं पीतं च वक्त्रामृतम् ।
जल्पन्त्यै[3]व मुहुर्न नेति निभृतं प्रध्वस्त[4]चारित्रया
निः[5]शेषेण समापितो रतं[6]विधिर्वाचा तु नाङ्गीकृतः ॥

**Shm* II 662 (कस्यचित्)

---

३१५ **Shm* II 677 (कस्यापि) *Sbhv* 2105 (कस्यापि) *Śp* 3706 (अमरुकस्य) Vāmana *ad* V 2, 8 (anon first *pāda* only) **S-Muktāv* XVIII 3 (anon) **S-Mukt* I 95 (anon) **Sml B* 148*b* (अमरुकस्य) Hemac p 314 (anon) [1] *Shm* कर, *Sbhv*, *Śp*, *S-Muktāv*, *S-Mukt*, Hemac मुहुः [2] *Shm*, *Sbhv*, *Śp*, *S-Muktāv*, *S-Mukt*, Hemac चे [3] *Sbhv* नारी पुन पतिमाश्रिता, *Śp* तन्वी पुनः°, MS मुर्हुमु, *S.-Muktāv* °चते, *S-Mukt* °च्विता

३१६ [1] *Śp* प्रशान्ते नूपुरारावे, *Sabhyāl* °नूपुराभावे [2] *Śp*, *Sabhyāl* मेखला [3] Apparently corrected from न्ति [4] *Śp* कान्ते नूनं रति°, *Sabhyāl* omits नूनं

३१७ [1] MS मु [2] *Shm* प्यु, MS मु [3] MS °ल्पान्त्यै [4] *Shm* प्रसब्ध [5] MS णि [6] MS भ

३१८

यत्पीनस्तनभारलालसलसद्वासःस्फुरद्गण्डया
तन्व(fol 51b)ङ्ग्या रभसार्पितं सरभसं वक्त्रं मुहुः पीयते ।
तच्छ्लाघ्यं सुरतं च तत्तदमृतं तद्वस्तु तद्ब्रह्म त
च्चेतोहारि तदेव तत्किमपि तत्तत्त्वान्तरं सर्वथा ॥

३१९

न वत विधृतः काञ्चीस्थाने करः श्लथवाससि[1]
प्रहितमसकृद्दीपे चक्षुर्घनस्थिरतेजसि ।
कुचकलशयोरूढः कम्पस्त्वया मम संनिधौ
मनसिजरुजो भावैरुक्ता वचोभिरपह्नुताः ॥

अभिनन्दस्य ॥

३२०

*Skm II 699 (प्र(च B)चलदासस्य)

हर्षाश्रुदूषितविलोचनया मयाद्य
किं तस्य तत्सुखि निरूपितमङ्गमङ्गम् ।
रोमाञ्चकञ्चुकतिरस्कृतदेहया वा
ज्ञातानि तानि परिरम्भसुखानि किं वा ॥

अचलस्य ॥

३२१

स कस्मान्मे प्रेयान् सखि कथमहं तस्य दयिता
यतो मां स्पृष्ट्वैव स्नपयति करं स्वेदपयसा ।

---

३१८ [1] MS ध or च ? [2] MS ह

३१९ [1] MS से (si) [2] MS inserts त (after क्र) [3] MS से (si)

३२० [1] *Skm* ०पूरि [2] *Skm* त्स [3] MS पे (pi) [4] MS ते (ti)

३२१ [1] MS पृ

विलोक्याश्लेषादप्यवहित इवामील्य नयने
व्युदञ्चद्रोमाञ्चस्थगितवपुरालिङ्गति स माम्[1] ॥

३२२

किमपि किमपि मन्दं मन्दमासत्ति[1]योगा
दविच[2]लितकपोलं[3] जल्पतोश्च[4] क्रमेण ।
अशिथिल[5]परिरम्भव्यापृतै[6]कैकदोष्णो
रविदितगतयामा रात्रि[7]रेवं व्यरंसीत् ॥

Uttarar i 27
Daśar ad iv 63
**Sml B* 147a
**Sabhyāl* fol xa,
**S-Prab* 81 anon

भवभूते. ॥

३२३

दाक्षिण्यादभिमानतो रसवशाद्विश्रामहेतो[1]र्मम
प्रागल्भ्याद्य[2]दनुष्ठितं मृगदृशा शक्यं[3] न तद्यो[4]षिताम् ।
निर्व्यूढं[5] न यदा तया तदखि[लं खि]न्नैस्तरत्ता[6]रकैः
सव्रीडैश्च विलोकितैर्मयि पुनर्न्य[7]स्तः समस्तो भरः ॥

**Shm* ii 674
'महाकवेः'

---

३२१ [1] MS मा

३२२ [1] Aiyar's edition of *Uttarar* reads क्ति, other editions agree with MS, *S-Prab* त्ति [2] *Uttarar*, *Daśar*, *S-Prab* र [3] MS ल [4] *Uttarar*, *Daśar*, *Sabhyāl*, *S-Prab* जल्पतोरक्र° [5] *Uttarar* also सपुलक°, so *Daśar*, *Sabhyāl* [6] MS ति [7] *Uttarar*, *Daśar*, *Sabhyāl*, *S-Prab* व, concerning which reading, fabled to have been suggested by Kālidāsa, see Bhandarkar's *Mālatīmādhava*, pp vi, vii

३२३ [1] *Shm* तु [2] *Shm* त्त [3] MS क्य [4] *Shm* च [5] MS ढ्य [6] *Shm* °वता° [7] MS न्य

३२४

वलितमनसोरप्यन्योन्यं समावृतभावयोः
पुनरुपचितप्रायः[1]प्रेम्णोः पुनस्त्रपमाणयोः ।
इह हि निविडव्रीडानङ्गज्वरातुरचेतसो
र्नवतरुणयोः को जानीते किमद्य फलिष्यति ॥

लक्ष्मी(fol. 52 missing)[धरस्य][2] ॥

---

३२४ [1] *Sic* MS. (for य ?). [2] Fol. 53*a* begins with चीयत (for दीयते, end of the verse *Sbhv*. 2099) ॥ भट्टश्रीशिवस्वामिनः ॥

॥ समाप्तनिधुवनचिह्नव्रज्या ॥

३२५

राजन्ति कान्त[1]नखरक्षतयो[2] मृगाक्ष्या
लाक्षा[3]रसद्रवमुचः कुचयोरुपान्ते ।
अन्तःप्रवृद्धमकरध्वजपावकस्य
शङ्के विभिद्य हृदयं निरगुः[5] स्फुलिङ्गाः ॥

राजशेखरस्य ॥

*Skm II 636 (कस्यापि)

३२६

जयन्ति कान्तास्तनमण्डलेषु
विटार्पितान्यार्द्रनखक्षतानि ।
लावण्यसंभारनिधानकुम्भे
मुद्राक्षराणीव मनोभवस्य ॥

*Skm II 637 (कस्यचित्)

३२७

क्वचित्ताम्बूलाङ्कः[1] क्वचिदगरुपङ्का[2]ङ्कमलिनः
क्वचिच्चूर्णोद्गारैः[3] क्वचिदपि च सालक्तकपदः ।

For refl see below

---

३२५ [1] MS न्ति [2] *Skm* °चतायाा (*sic*) [3] MS च्चा
[4] MS भे (*bhi*) [5] *Skm* नि(for वि)विशु. (A) and निरगुः (B),
MS °जगुः

३२७ *Sbhi* 2131 (कस्यापि) *Śp* 3700 (कस्यापि) *Sāhityad*
p 42 (anon) *Daśar* ad II 17 (anon) Amaru, 107
[1] *Sbhi*, *Śp*, *Sāhityad*, *Daśar*, Amaru क्तः [2] MS य
[3] *Sbhi*, *Śp*, *Sāhityad*, *Daśar*, Amaru री

बलीभङ्गाभोगेष्वलकपतिताकीर्णकुसुमः
स्त्रियाः सर्वावस्थं कथयति रतं प्रच्छदपटः ॥

३२८

*Skm II 638 (कस्यचित्) *Sabhyal I 106 (anon.)

पीनतुङ्गकठिनस्तनान्तरे
कान्तदत्तमबला नखक्षतम् ।
आवृणोति विवृणोति चेक्षते
लब्धरत्नमिव दुःखितो जनः ॥

३२९

*Skm II 704 (भवभूतेः)

उषसि गुरुसमक्षं लज्जमाना मृगाक्षी
रतिरुतमनुकर्तुं राजकीरे प्रवृत्ते ।
तिरयति शिशुलीलानर्तनच्छद्मताल
प्रचलवल[य]मालास्फालकोलाहलेन ॥

३३०

प्रदोषे दम्पत्योर्निजरुजि विभिन्ने प्रणयिनो
र्विभिन्ने संपन्ने घनतिमिरसंकेतगहने ।
रतौत्सुक्यात्ताम्यत्तरलमनसोः पर्यवसिते
कृतार्थत्वेऽन्योन्यं तदनु विदितौ किं नु कुरुताम् ॥

---

३२७ [1] *Śp*, *Sāhityad*, *Daśar*, Amaru °गैर् [2] MS य [3] *Śp* °तैः की, *Sāhityad*, *Daśar*, Amaru °तैः शी [4] Amaru नाना [5] MS भ

३२८ [1] *Skm* also (B) °गुणा [2] MS तः [3] MS °दृशो [4] *Skm*, *Sabhyāl* वीक्षते [5] *Sic* MS (for दुःस्थितो 'poor'?), *Skm*, *Sabhyāl* निर्धनो [6] In *Sabhyāl* *c-d* precede *a-b*

३२९ [1] MS द्रव, द्र and उ being easily confused [2] MS र्दं [3] *Skm* also (A) प्र [4] MS य, a mistaken correction (of ल?), due to the following omitted य [5] MS वा read बाह्या° ?

३३० [1] MS भे (*bhi*) [2] MS स [3] MS °त्वे च [4] MS र

३३१

पश्यसि न(fol 53b)खसंभूतां रेखां वरतनु पयोधरोपान्ते ।
किं[1] वाससा स्तनान्तं रुणत्सि हिमरुचिकृतेवाह्नि[2] ॥

३३२

यद्राचौ[1] रहसि व्यपेतविनयं दृष्टं[2] रसात्कामिनो
रन्योन्यं शयनीयमीहितरसव्याप्तिप्रवृत्तस्पृहम् ।
तत्सानन्दमिलद्दृशोः कथमपि स्मृत्वा गुरूणां पुरो
हासोद्भेदनिरोधमन्थरमिलत्तारं कथंचित्स्थितम्[4] ॥

Sbhi 2212 (अमरुकस्य) Śp 3741 ( )

३३३

किं भूषणेन रचितेन हिरण्मयेन
किं[1] रोचनादिरचितेन विशेषकेण ।
आर्द्राणि कुङ्कुमरुचीनि विलासिनीना
मङ्गेषु किं नखपदानि न मण्डनानि ॥

Sbhi 2165 (भट्टकुमारस्य)

३३४

दंपत्योर्निशि जल्पितं गृहशुके[ना]कर्णितं यद्वचः
प्रातस्तद्गुरुसंनिधौ निगदतस्तस्यैव तारं[3] वधूः ।

For rest see below

---

३३१ [1] MS के (kim) [2] MS °वह्नि

३३२ [1] MS चे [2] Sbhi, Śp वृत्त [3] Sbhi, Śp °सावा [4] MS त्स्थे (tsthi)

३३३ [1] MS कि

३३४ *Skm II 705 (अमरो.) Sbhi 2214 (कस्यापि) Śp 3743 (कस्यापि) Amaru, 16 Kuvalay ad 155 (anon) Ak p 358 (anon) *Sabhyāl II ad fin (22a) (अमरुकस्य) *S-Mukt I 28 (anon) *S-Prab 60 (anon) [1] All the other texts °त्यतोर्गृ [2] S-Mukt प्रायस्त°, Skm also (A) तत्प्रातर्गु, which the other texts all read [3] Skm °स्तोपहार, Sbhi, Śp, Kuvalay, Sṛngāradīpikā ad Amaru, 16 °स्तातिमात्रं, Amaru, S-Prab श्रुत्वैव तारं

हाराकर्षित[1]पद्मरागशकलं विन्यस्य चञ्चोः पुरो[2]
व्रीडार्त्ता प्रकरोति[3] दाडिमफलव्याजेन वाग्बन्धनम् ॥

३३५

*Skm II 701 (डिम्बोकस्य) Amaru, 117

प्रयच्छाहारं मे यदि तव रहोवृत्तमखिलं
मया वाच्यं नोच्चैरिति गृहशुके जल्पति शनैः ।
वधूवक्त्रं व्रीडाभर[1]नमितमन्तर्विहसितं
हरत्यर्धोन्मीलन्नलिनमनिला[3]वर्जितमिव ॥

३३६

*Skm II 639 (कस्यचित्)

नखक्षतं यन्नवचन्द्रसंनिभं
स्थितं कृशाङ्गि स्तनमण्डले तव ।
इदं तरीतुं त्रिबलीतरङ्गिणी[2]
विराजते पञ्चशरस्य नौरिव ॥

३३७

*Skm II 116 (कस्यचित्)

हंहो कान्त रहोगतेन भवता यत्पूर्वमावेदितं
निर्भिन्ना तनुरावयोरिति मया तज्ज्ञातमद्य स्फुटम् ।
कामिन्या स्मरवेदनाकु(f 54a) [ल]दृशा यः केलिकाले कृतः
सो ऽत्यर्थं कथमन्यथा दहति मामेष त्वदोष्ठव्रणः ॥

---

३३४ [1] *Skm* कर्णालक्षित, *Sbhv*, *Śp*, Amaru, *Kuvalay*, *Ak*, *S-Mukt*, *Sabhyāl*, *S-Prab* कर्णावलम्बित [2] *Skm*, *Kuvalay*, *Śṛngāradīpikā ad* Amaru, *S-Mukt* चञ्चूपुटे, *Sbhv*, *Śp*, Amaru चञ्च्वाः पुटे, *S-Prab*, *Sabhyāl* चचोः पुटे (*sic*) [3] *Kuvalay*, *Ak*, *Śṛngāradīpikā* विदधाति

३३५ [1] Amaru वो [2] MS म [3] *Skm* °लिना

३३६ [1] MS रा [2] MS णी [3] MS द्वि (for त्रि?)

३३७ [1] *Skm* ज्ञा [2] *Skm* तु(नु?)द

३३८

अभिमुखपतयालुभिर्ललाट
श्रमसलिलैरविधौतपत्त्रलेखः ।
कथयति पुरुषायितं वधूनां
मृदितहिमद्युतिदुर्मनाः कपोलः ॥
मुरारे: ॥

[illegible]

३३९

नखपदबलिनाभीसंधिभागेषु लक्ष्यः
क्षतिषु च दशनानामङ्गनायाः सशेषः ।
अपि रहसि कृतानां वाग्विहीनो ऽपि जातः
सुरतविलसितानां वर्णको वर्णको ऽसौ ॥

Śiśupālavadha XI 24

३४०

द्रवनखपदभङ्गं गोपयस्यंशुकेन
स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टम् ।
प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्पे
न्नवपरिमलगन्धः केन शक्यो वरीतुम् ॥
माघस्यैतौ ॥

Śiśupālavadha XI 34
Sbhv 2171
Daśar ad II 23 IV 55 (anon)
Sāhityad p 82 (anon)
At p 64 (anon)

---

३३८ [1] MS ति [2] MS °युच [3] *Anargh* °वधू [4] *Anargh* also °निर्मलः

३३९ [1] MS मा [2] MS मु, read गुहसि, though the word is not known elsewhere ? [3] MS नी

३४० [1] All other texts न and म respectively see Exegetical Notes at end [2] *Sbhv*, *At* मुङ्ग [3] MS श्र [4] *Sbhv* त्वद [5] MS स्ये

३४१

(Skm II 610)

काश्मीरपङ्कखचितस्तनपृष्ठताम्र
पट्टा[1]वकीर्णदयितार्द्रनखाक्षराली[2] ।
एणीदृशः कुसुमचापपरेन्द्र[3]दत्त
तारुण्यशासनमिव प्रकटीकरोति ॥

दत्तस्य ॥

३४२

अध[1]रपद्मरागो ऽयमनर्घः सव्रणो ऽपि[2] ते ।
मुग्धे हस्तः किमर्थो ऽयमपार्थे[3] इह दीयते ॥

३४३

दरस्रावं[1] वासो लुलितकुसुमालंकृति[2] शिरः
श्लथालोकं चक्षुः सरसनखलेखाङ्कितमुरः ।
लसत्काञ्चीग्रन्थिस्फुरदरुणरत्नांशु जघनं
प्रियाङ्गोन्मृष्टाङ्ग्या विष†मिदषियङ्गा†[3]वकनृणाम् ॥

वल्लं[4]णस्य ॥

३४४

(Skm II 702 मार्जारस्य)

प्रत्यूषे गुरुसंनिधौ गृहशुके तत्तद्रहोजल्पितं
प्रस्तोतुं[1] परिहासकारिणि पदैरर्धोदितैरुद्यते ।
क्रीडाशारिकया निलीय निभृतं त्रातुं त्रपा[2]र्तां वधूं
प्रारब्धः सहसैव संभ्रमकरो मार्जारगर्जारवः ॥

---

३४१ [1] *Skm* also ॰र्णा (B) [2] *Skm* ॰खचतानां and ॰नी (*sic*) [3] *Skm* ॰नवेन्द्र (for नरेन्द्र?)

३४२ [1] MS रः [2] MS यि [3] MS र्थः

३४३ [1] *Sic* MS [2] MS ते (*ti*) [3] For suggestions as to the reading here see Exegetical Notes [4] MS स

३४४ [1] MS स्तु [2] MS ॰या॰, *Skm* भया and (B) चपा

३४५

तल्पे[1] चम्पककल्पिते सखि गृहोद्याने ऽद्य fol 34b सुप्ता-
सि किं
तत्किञ्जल्कचयं न पश्यसि कुचोपान्ते विमर्दारुणम् ।
आः किं छद्मविदग्धमानिनि मयि ब्रूषे पुरोभागिनि
क्रूरैरुल्लिखितास्मि तत्र कुसुमान्युच्चिन्वती कण्टकैः ॥

सोन्नोकस्य ॥

३४६

Anargha ix 3

इतः पौरस्त्यायां ककुभि विवृणोति क्रमदल
त्तमिस्रा[1]मर्माणं किरणकणिकामम्बरमणिः ।
इतो निष्क्रामन्ती नवरतिगुरोः प्रोञ्छति वधूः
स्वकस्तूरीपत्त्राङ्कुरमकरिकामुद्रितमुरः ॥

३४७

Anargha ix 6
Jayaratha ad Ak p 76 (anon)
*Saml 68 (anon)

प्रभाते पृच्छन्तीरनुरहसवृत्तं सहचरी
र्नवोढा न व्रीडामुकुलितमुखीयं सुखयति ।
लिखन्तीनां पत्त्राङ्कुरमनिशमस्यास्तु कुचयो
श्चमत्कारो गूढं करजपदमासां कथयति ॥

मुरारेरेतौ ॥

---

३४५ [1] MS तुल्ये
३४६ [1] MS श्रा [2] MS पु
३४७ [1] MS सि, cf Pānini, v 4, 81 [2] Jayar कथ°
[3] MS ले (h)

॥ मानिनीव्रज्या[1] ॥

३४८

Śp 3547 (anon) Sarasvatīk ad v 176 (anon) *Sabhyāl B 4b (anon)

मानोन्नतेत्य[सहनेत्य]तिपण्डितेति
मय्येव धिक्कृति[1]रनेकमुखी सखीनाम् ।
आकार[2]मात्रमसृणेन विचेष्टितेन
धूर्तस्य तस्य हि[3] गुणानुपवर्णयन्ति[4] ॥

लक्ष्मीधरस्य ॥

३४९

*Skm II 226 (अमरो.) Sbhv 1575 *Sml B 102b

वलतु[1] तरला धृष्टा दृष्टिः खला सखि मेखला
स्खलतु कुचयोरुत्कम्पान्मे विदीर्यतु कञ्चुकम् ।
तदपि न मया संभाष्यो[2] ऽसौ पुनर्दयितः[3] शठः
स्फुटति हृदयं मौनेनात्मने मे यदि तत्क्षणात् ॥

अमरुकस्य ॥

३५०

Sbhv 1577 (कस्यापि) Śp 3538 (सकुलस्य) *Sabhyāl 30a (,,)

तदेवाजिह्माक्षं मुखमविषदास्ता गिर इमाः
स एवाङ्गाक्षेपो[2] मयि सरसमालिङ्गति[3] तनुम् ।

---

[1] MS न

३४८ [1] MS कृत ? [2] Śp, Sabhyāl, Sarasvatīk दाक्षिण्य [3] Sarasvatīk तु [4] Sarasvatīk °रज्ञ

३४९ [1] Sbhv, Sml B च [2] Skm, Sbhv °व्यो [3] MS here inserts शतः (dittography) [4] Sbhv मा

३५० [1] Sbhv, Śp, Sabhyāl ग्र [2] Śp, Sabhyāl °क्षेपो [3] MS त, Sbhv, Śp, Sabhyāl °श्लिष्यति

यदुक्तं [प्रत्युक्तं] तदपटु शिरःकम्पनपरं
प्रिया मानेनाहो पुनरपि कृता मे नववधूः ॥

शम्बूकस्य ॥

३५१

यदि विनिहिता शून्या दृष्टिः किमु स्थिरकौतुका
यदि विरचितो मौने यत्नः किमु (fol 55a) स्फुरितो ऽधरः।
यदि नियमितं ध्याने चक्षुः[1] कथं पुलकोद्गमः
कृतमभिनयैर्दृष्टो मानः प्रसीद विमुच्यताम् ॥

अमरुकस्य ॥

Sbh 1 211
अमरु
Skm 1025

३५२

एकत्रासनसंस्थितिः[2] परिहृता प्रत्युद्गमाद्दूरत
स्ताम्बूलाहरणच्छलेन रभसाश्लेषक्रमो[5] विघ्नितः।
संलापो[7] ऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
भर्तुः[10] प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥

श्रीहर्षस्य[11] ॥

F 1 11 # ...
1 ...

---

३५० [1] *Sabhyāl* च

३५१ [1] *Sbhv*, Amaru चेतः [2] *Skm* also (A) दृ

३५२ **Skm* II 217 (अमरोः) *Sbh* 1583 (पुलिनस्य) *Śp* 3534 (कस्यापि) Amaru, 18 *Sāhityad* p 44 (anon) *Daśar ad* II 18 (अमरुशतके) *Sarasvatīk ad* v 170 (anon) *Rasataraṅgiṇī* v *ad fin* (anon) **Sml P* 84b (पुलिन्दस्य) **Sml B* 102b (Amaru) Hemac p 304 (anon) [1] *Sarasvatīk*, Hemac ग [2] MS तेः (*tih*) [3] MS द्रू (inserted by revisor) [4] *Skm*, *Sbh*, *Sarasvatīk*, Hemac, *Sāhityad* °नयन, *Śp*, *Sml P*, Amaru, *Daśar* °हरण [5] All other texts श्लेषो ऽपि स° [6] All other texts न्ना [7] MS यो [8] *Indische*

३५३

Jm itf c / t ion

तद्वक्त्राभिमुखं मुखं विनिहितं[2] दृष्टिर्धृता[3] चान्यत[1]
स्तस्यालापकुतूहलाकुलतरे श्रोत्रे निरुद्धे मया।
हस्ताभ्यां[5] च तिरस्कृतः[6] सपुलकः स्वेदोद्गमो गण्डयोः
सख्यः किं करवाणि यान्ति शतधा[8] यत्कञ्चुके[9] संधयः॥

३५४

For itf see below

दूराद्[1]त्सुकमागते विचलितं[2] संभाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने[3] कोपाञ्चितं[4]भ्रूलतम्।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णं[5] क्षणा
च्चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि॥

रतिपालस्य॥

---

३५३ **Skm* II 229 (अमरोः) *Sbhv* 1581 (कस्यापि) *Śp* 3535 (अमरुकस्य) Amaru, 11 **Sml B* 102*b* (Amaru) **S-Ratnak* v 319 (anon) Hemac p 101, Comm (anon) [1] Corrected from य [2] All other texts विनमित [3] All other texts °ष्टिः कृता [4] *Skm*, *S-Ratnak*, Hemac, Amaru पादयोस् [5] *Śp*, Hemac, Amaru पाणिभ्यां [6] *Skm* अपि वारितः, *Sbhv* विनिवारितः, *S-Ratnak* has °कृतस्य पु° [7] MS मौ [8] *Skm* सहसा [9] MS त corrected to य

३५४ **Skm* II 249 (अमरोः) *Śp* 3539 (कस्यापि) Amaru, 49 **Sml P* 84*a* (अमरुकस्य) **Sml B* 102*b* (Amaru) **Saml* 137 (anon) *Sarasvatīk ad* v (anon) *Kāvyapr ad* IV 24 (anon) *Kāvyaprad ad* IV 5, VII 15 (anon) **Rasavilāsa*, § 22 (anon) Hemac p 67 (anon) **S-Prab* 47 (anon) **Kāvyadarpana* 34*a* (*a* only) [1] *Śp* वेगादु°, *Sarasvatīk* एष्यत्यु° [2] All other texts च, excepting Hemac, *Śp*, *Sml P* (which reads तरलित), and *S-Prab* (विलुलित) [3] *S-Prab* च [4] *Skm* °पानत, *Saml*, *Rasavilāsa*, Hemac, and *Kāvyaprad* in IV 5 किं चाञ्चित [5] *Śp*, Amaru, *Sml P*, *Skm* (B), *Kāvyapr*, *Sarasvatīk*, *Kāvyaprad*, *Rasavilāsa*, Hemac, *S-Prab* °पूर्णेक्षणं, *Saml* °पूरेक्षणं

३५५

व[1]चोवृत्ति[2]र्मा[3] भूद्वलतु च न वा वक्त्रमभि[तो]
न नाम स्याद्वाष्पापगमविषदं लोचनयुगम् ।
समाश्वा[4]सस्तेन प्रणतशिरसः पत्युरभव
त्प्रिया प्रौढक्रोधाप्यपहृतवती यन्न चरणौ ॥

वोपाल्लितस्य ॥

३५६

*[illegible] 251 (भावदेव्याः)
*Padyāv 377 (कस्यचित्)

किं पादान्ते प[1]तसि विरम[2] स्वामिनो हि स्वतन्त्राः
कंचित्कालं क्वचिदपि रति[3]स्तेन[4] कस्ते ऽपराधः ।
आगस्कारिण्यहमिह यया जीवितं त्वद्वियोगे
भर्तृप्राणाः स्त्रिय इति[5] ननु त्वं मयैवानुनेयः ॥

वाक्कूटस्य ॥

३५७

Sbhr 1626 (कस्यापि)
Śp 3561 (,,)
*Sml B 109b (Amaru)

यद्रम्यं गुरुगौरवस्य सुहृदो यस्मिल्ँ[1] लभन्ते ऽन्तरं
यद्दाक्षिण्यरसाद्भिया[2] च स(fol 55b)हसा[3] नर्मोपचारा-
ण्यपि[4] ।
यल्लज्जा निरुणद्धि यत्र शपथैरुत्पाद्यते प्रत्यय
स्तत्किं प्रेम स उच्यते परिचयस्तत्रापि कोपेन[5] किम् ॥

---

३५५ [1] Corrected from न ० [2] MS र्त्ति [3] MS स्वा [4] MS प

३५६ [1] MS य [2] *Padyāv* लुठसि विमनाः [3] *Skm* and *Padyāv* त the latter proceeds ०स्तत्र [4] MS री [5] MS ते (*ti*)

३५७ [1] MS न् [2] *Sbhr* ०द्भयाच्च [3] *Śp* सहते [4] *Sbhr* ०राण्यदि, *Śp* ०रानपि [5] *Sbhr* कोपो ऽस्ति, MS ०पेन

३५८

For reff see below

भ्रूभङ्गो[1] गुणितश्[2]चिरं नयनयोरभ्यस्तमामीलनं
रोद्धुं शिक्षितमादरेण हसितं मौने ऽभियोगः कृतः ।
धैर्यं[3] कर्तुमपि स्थिरीकृतमिदं चेतः[4] कथंचिन्मया
बद्धो मानपरिग्रहः परिकरे[5] सिद्धिस्तु दैवे स्थिता ॥

धर्मकीर्त्तेः ॥

३५९

For reff see below

तथा[1]भूदस्माकं प्रथममविभिन्ना[2] तनुरियं
ततो ऽनु त्वं प्रेयानह[3]मपि हताशा प्रियतमा ।
इदानीं नाथस्त्वं[4] वयमपि कलत्रं किमपरं
मयाप्तं[5] प्राणानां कुलिशकठिनानां फलमिदम् ॥

भावकदेव्याः ॥

---

३५८ *Skm II 228 (धर्मकीर्त्तेः and also (A) अमरोः) Sbhv 1578 (अमरुकस्य) *Padyāv 230 (अमरोः) *Sml P 84b (अमरुकस्य) *Sml B 102b (अमरुकस्य) Nami ad Rudrata VI 46 (anon) *S-Mukt I 93 (anon) Amaru, 97 [1] Skm, Sbhv, Sml P, Sml B, Amaru, Nami, S-Mukt ॰भेदो [2] Skm रचित [3] MS वै [4] MS त [5] All other texts ॰हे परिकरः

३५९ *Skm II 232 (अमरोः) Sbhv 1622 (कस्यापि) Śp 3558 (अमरकस्य) *Sml B 105b (Amaru) *Saml 145 (anon) Amaru, 69 Kuvalay ad 110 (anon) *S-Mukt I 81 (anon) Hemac p 305 (anon) Padyaracanā, VIII 14 (अमरुकस्य) [1] Padyarac and Amaru (some versions) यदा, Śp, Kuvalay, Saml, S-Mukt पुरा [2] Amaru, Saml, Padyarac ॰भक्ता [3] Kuvalay, S-Mukt ॰न्वय [4] Hemac त्वं नाथो [5] Kuvalay व्रतानां

३६०

यदा त्वं चन्द्रो ऽभूरविकलकलापेशलवपु[1]
स्तदाहं जातार्द्रा[2] शशधरमणीनां प्रतिकृतिः[4]।
इदानीमर्कस्त्वं खररुचिसमुत्सारितरसः
किरन्ती कोपाग्नीनहमपि रविग्रावघटिता ॥

अचलसिंहस्य ॥

३६१

कोपो[1] यत्र भ्रुकुटिरचना निग्रहो यत्र मौनं
यत्रान्योन्यस्मितमनुनयो दृष्टिपातः[2] प्रसादः।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं
त्वं पादान्ते लुठसि[3] न हि[4] मे मन्युमोक्षः खलायाः ॥

प्रद्युम्नस्य ॥

३६२

शठान्यस्याः काञ्चीमणिरणितमाकर्ण्य सह[सा]
समाश्लिष्यन्नेव प्रशिथिलभु[ज]ग्रन्थिरभवः।

---

३६० *Skm II 235 (अचलस्य) Śp 3564 (अचलस्य) *Sml P 88b (अचलस्य) *Sml B 107a (अचलस्य) *Sabhyāl II 38 (भावमिश्रस्य) [1] Śp ०भूः शिशिरकरसपर्करुचिर, Sabhyāl ०भूः ०००र्कमधुर, Sml P ०भूर्हिमकरकलाप(sic)सलवपु [2] Skm तदार्द्रा जाताहं [3] MS ग, Śp कृष्ण, so also Sabhyāl (कृश) [4] Skm प्रकृतिभिः

३६१ *Skm II 234 (अमरो.) Sbh 1630 (कस्यापि) Śp 3562 (वामनस्य) *Sml B 106a (वामनस्य) Amaru, 38 Daśar ad II 18 (अमरुशतके) Sarasvatīk ad V 138 (anon) [1] MS correction (from सौ ?) [2] MS त, Skm यत्र दृष्टि. [3] Sbh पतसि [4] All other texts च

३६२ *Padyāv 261 (समाहर्तु.) Daśar ad II 6 (anon) Sāhityad p 34 (anon) Amaru, 109 *Sabhyāl IV 8 (अमरस्य) [1] All other texts यदा MS सहसमा with T deleted before म [2] MS नै

तदेतत्क्वाचक्षे[1] घृतमधुमय त्वन्मृदु[2] वचो
विषेणाघूर्णन्ती किमपि न सखीयं[3] गणयति ॥

हिङ्गोकस्य ॥

३६३

मुग्धासि नायमपराध्य[1]ति सै[2]वमालि
केयं रुषा प[3]रुषिता लिखिताप्यनेन ।
केलिस्खलद्वसनमु(fol 56a)त्पुलकाङ्गभङ्ग
मुत्तुङ्गपीनकुचमालिखिता त्वमेव ॥

वीर्यमित्र[4]स्य ॥

३६४

*Skm ii 420 (पाणिनेः)

पाणौ शोणतले[1] तनूदरि दरक्षा[2]रं[3] कपोलस्थलं[4]
विन्य[5]स्या[6]ञ्जनदिग्धलो[च]नजलैः किं म्लानिमानीयते ।
मुग्धे चुम्बतु नाम चञ्चलतया भृङ्गः क्वचित्कन्दली
मुन्मीलन्नवमालतीपरिमलः किं तेन विस्मर्यते ॥

३६५

कोपः सखि प्रियतमे ननु वञ्चनैव
तन्मुञ्च मानिनि रुषं क्रियतां प्रसादः ।
प्राणेश्वरश्चरणयोः पतितस्तवायं
संभाष[1]तां विकसता नयनोत्पलेन ॥

---

३६२ [1] *Padyā* °तद्व्याचक्षे or °च्चे, *Daśar*, Amaru, *Sk* ... (?) क्वाचक्षे, MS °तङ्क्ता (?) for °तत्क्वा [2] All other texts °त्वद्वङ्ग [3] All other texts मे

३६३ [1] MS ध्यं [2] *Sic* MS (for मै ?) [3] MS य [4] MS तु

३६४ [1] *Skm* also (A) मे [2] *Skm* also (B) च [3] MS र, *Skm* मा [4] *Skm* ली [5] MS न्या, with mark of error against the vowel [6] *Skm* स्ता

३६५ [1] MS *sic* (see Exegetical Notes)

३६६

बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि।
तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥

कुमारभट्टस्य ॥

For reff see below

३६७

गतप्राया रात्रिः कृशतनु[1] शशी शीर्यत[2] इव
प्रदीपो[3]ऽयं निद्रावशमुपगतो घूर्णत इव।
प्रणामान्तो[5] मानस्त्यजसि न तथापि क्रुधमहो
कुचप्रत्यासत्त्या[8] हृदयमपि ते चरिड[9] कठिनम् ॥

महोदधेः ॥

For reff see below

---

३६६ *Shm II 216 (अमरोः) Sbhi 1614 (भट्टकुमारस्य) Śp 3554 (कुमारदासस्य) *Sml P 86b (कुमारदासस्य) *Sml B 105a (कुमारदासस्य) Amaru, 57 Sāhityad p 43 (anon) Daśar ad II 16 (Amaru) Sarasvatīk ad I 117, II 144 (anon) *S-Ślokāh 13b (anon) *Sabhyāl 30a (कुमारदासस्य) *S-Mukt I 53 (anon) Ananta ad Rasam p 42 (anon) Hemac p 149 (anon) [1] S-Mukt दो [2] Sarasvatīk I 117 सि [3] Sabhyāl मन [4] Hemac त्वे [5] S-Ślokāh भवानि

३६७ Sbhv 1612 (बाणभट्टस्य) Śp 3713 (कस्यापि) Buhler, Ind Antiquary, I p 114 (Bāna) At p 54 (anon) *Sml P 120a (anon) *Sabhyāl IV (21a कस्यापि) Padyaracanā IX 1 (कस्यापि) *Padyaveṇī V 34 (anon). [1] Śp, Sabhyāl, Padyarac, Padyaveṇī शशिमुखि [2] Sbhi सीदत, Buhler शशीयत (sic) [3] MS यो [4] At, Sabhyāl र्णि [5] Buhler न्ते, At ॰न्तः कोप॰ [6] Buhler ॰न त्व [7] Buhler यथा त्व; Śp, Sabhyāl ॰नस्तदपि न जहासि, Padyaveṇī ॰दपि वहसि त्व [8] MS ॰शत्या [9] Buhler सुभ्रु

३६८

गतो दूरं चन्द्रो जठरलवलीपाण्डरवपु
र्दिशः किंचित्किंचित्तरणिकिरणैर्लोहितरुचः।
इदं निद्राच्छेदे रसति सरसं सारसकुलं
चकोराक्षि क्षिप्रं जहिहि जहिहि प्रेमलडितम् ॥

३६९

*Shm II 197 (विम्बोकस्य) *Sml P 123a (कस्यापि)

मया तावद्गोत्रस्खलितहतकोपान्तरितया
न रुद्धो निर्गच्छन्नयमतिविलक्षः प्रियतमः।
अयं त्वाकूतज्ञः परिणतिपरामर्श[1]कुशलः
सखीलोको ऽप्यासील्लिखित इव चित्रेण किमिदम् ॥

हिम्बोकस्य ॥

३७०

- ⌣ --- (अमरो॰) Jayaratha ad As p 5 (anon)

[विदितं कृत्या[1]लापैरलं प्रिय गम्यतां
तनु(fol 56b)रपि न ते दोषो ऽस्माकं विधिस्तु पराङ्मुखः।
तव यदि तथा[2]रूढं प्रेम प्रपन्नमिमां दशां
प्रकृतिचपले[3] का नः पीडा गते हतजीविते ॥

धर्मकीर्त्तेः ॥

३७१

For reff see below

असद्वृत्तो नायं न च सखि[1] गुणैरेष रहितः
प्रियो मुक्ताहारस्तव चरणमूले निपतितः।

---

३६९ [1] MS र्ष

३७० [1] Padyāv भव्या, Jayar व्यर्था [2] Padyāv ॰भूत [3] Jayar ॰तरले

३७१ *Shm II 237 (कस्यचित्) Sbhv 1607 (अमरुकस्य) Śp 3552 (कस्यापि) *Sml P 86a (anon) *Saml 143 (anon) [1] Sbhv, Śp, Sml. खलु, Saml भवति न गुणैर्वा विरहितः

गृहाणैनं मुग्धे व्रजतु तव[1] कण्ठप्रणयिता
मुपायो नास्त्यन्यो हृदयपरि[2]तापोपश[म]ने ॥

३७२

अनालोच्य[1] प्रेम्णः परिणतिमनादृत्य सुहृद
स्त्वया[2]काण्डे[3] मानः किमिति शरले प्रेयसि[4] कृ[5]तः ।
समाकृष्टा ह्येते विरह[6]दहनोद्भासुर[7]शिखाः
स्वहस्तेनाङ्गारास्तदलमधुनारण्यरु[8]दितैः ॥

विकटनितम्बायाः ॥

For reff see below

३७३

मा रोदीः सखि नश्यदन्धतमसं पश्याम्बरं ज्योत्स्नया
शीतांशुः सुधया विलिम्पति सखाराज्ञो मनोजन्मनः ।
कः कोपावसरः प्रसीद रहसि स्वेदाम्भसां बिन्दवो
लुम्प[1]न्तु स्तनपत्र[2]भङ्गमकरीः सौधागुरु[3]श्यामलाः ॥

३७४

मा रोदीः करपल्लवप्रणयिनीं कृत्वा कपोलस्थलीं
मा भाङ्क्षीः परिखेदसाक्षिभिरिव श्वासैर्मुखेन्दोः श्रियम् ।

---

३७१ [1] *Sbhv* निज [2] *Sml* तव हृदय॰ , *Saml* तव हृदयदाहो॰

३७२ **Skm* II 206 (राजशेखरस्य) *Sbhv* 1170 (कस्यापि) **Sml B* 104*b* (वाग्भटस्य) Amaru, 80 **Padyāv* 228 (अमरोः) **Saml* 141 (anon) **S-Mukt* I 99 (anon) [1] *Saml* क्व [2] MS या. (for याऽ?) [3] Amaru also मुग्धे, so *S-Mukt* [4] *Sbhv*, *Saml*, Amaru संप्रति [5] *Sbhv* धृ, *S-Mukt* सरलत्वे नविढि (*sic*) [6] *Sbhv*, *Saml*, Amaru प्रलय [7] *S-Mukt* ॰सित [8] *Sbhv* ॰ना तस्य रु॰, the MS has ण्य for स्य

३७३ [1] MS प [2] MS तु or त्त [3] MS र

मुग्धे दग्धगिरः स्खलन्ति शतशः किं कुप्यसि प्रेयसि
प्राणास्तन्वि ममासि नोचितमिदं तद्व्यर्थमुत्ताम्यसि ॥

३७५

Śp 1171 (कस्यापि)

यदेतन्नेत्राम्भः पतदपि[1] समासाद्य तरुणी
कपोले[2]व्यासङ्गं कुचकलशमस्याः कलयति ।
ततः श्रोणीबिम्बं व्यवसितविलासं तदुचितं
स्वभावस्वच्छानां विपदपि सुखं[3] नान्तरयति ॥

३७६

*Skm II 139

पक्ष्मान्तस्खलिताः कपोलफलके लोलं लुठन्तः क्षणं
धारालास्तरलोत्स[1]लत्तनुकणाः पीनस्तनास्फालनात् ।
कस्माद्ब्रूहि त[2]वाद्य कण्ठ(fol 57a)विगलन्मुक्तावलीविभ्रमं
बिभ्राणा निपतन्ति बाष्पपयसां प्रस्यन्दिनो बिन्दवः ॥

राजशेखरस्य ॥

३७७

For reff see below

कपोले पत्त्राली करतलनिरोधेन मृदिता[1]
निपीतो निःश्वासै[2]रयममृतहृद्यो ऽधररसः ।

---

३७५ [1] MS ये (yi) [2] Śp ले [3] MS corrected from खा

३७६ [1] Skm च्छ [2] MS भ

३७७ *Skm II 245 (कस्यचित्) Sbhv 1627 (कस्यापि) Amaru, 81 *Dhvanyāl ad* II 17 (anon) *Ak* p 261 (anon) *Sarasvatīk ad* V 185 (anon) *S-Mukt* I 90 (anon) [1] *S.-Mukt* वि(चि)हिता [2] MS and *Skm* नि (for निः) see the lexica [3] MS corrected from °सौ

मुहुः[1] कण्ठे लग्नस्तरलयति बाष्पः स्तनतटं[3]
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम् ॥

३७८

धिग्धिंक्कामयि केन दुर्मुखि कृतं किं किं न कायव्रतं
द्विवाण्यच दिनानि को न कुपितः को नाभवन्मा . . ।
स्मः केचिन्न[3] वयं यदेकमपरस्याप्युक्तमाकर्ण्यता
मत्युन्माथिनि चन्दने ऽपि नियतं नामाभिरुन्निष्ठति ॥

वैद्यण्यस्य ॥

३७९

स्फुटतु हृदयं कामः कामं[1] करोतु तनुं तनुं
न खलु[2] चटुल[प्रे]म्णा कार्यं पुनर्दयितेन मे ।
इति सरभसं मानाटोपादुदीर्य वचस्तया
रमणपदवी शारङ्गाक्ष्या सशङ्कितमीक्षिता ॥

For reff see below

---

३७७ [1] MS द्र [2] *Sarasvatīk* लग्नः कण्ठे त°, *Skm* °प्न स्ति(or स्थि)रयति MS writes लग्न twice, the म being in the former case lost [3] *Sarasvatīk* टी, *S-Mukt* °भर

३७८ [1] MS ग्धे (*gdhi*) [2] Two syllables (नवान् ?) lost [3] MS च्च [4] MS क

३७९ **Skm* II 230 (अमरोः and (B) कस्यचित्) *Sbhi* 1574 (अर्भकस्य) Amaru, 73 **Sml P* 84*a* (अमरुकस्य) **Sml B* 102*a* (अमरुकस्य) **S-Mukt* I 84 (anon) [1] *Sbhv* काम कामः [2] *Skm*, *S-Mukt*, Amaru सखि [3] *Sbhv*, Amaru प [4] Amaru, *Sml P* °वेग्ना, Amaru also °कोपाटोपा (*Śṛngāra-dīpikā*) and °मानोद्रेका (*Śatakāvali*) [5] MS स्त्र [6] MS प [7] Amaru also निरन्तर (so *Sml P*) and ससंभ्रम, the *Śṛngāra-dīpikā* agrees with our MS

३८०

For reff see below

एकस्मिञ्छयने[1] पराङ्मुखतया वीतोत्तरं ताम्यतो
र[न्योन्यं] हृदये[2] स्थिते ऽप्यनुनये संरक्षतोर्गौरवम्।
पश्चादाकुलयो[3]रपाङ्गवलनान्मिश्रीभवच्चक्षुषो
र्भग्नो मानकलिः[4] सहासरभस[5]व्यावृत्त[6]कण्ठग्रहः[7]॥

३८१

कन्दर्पकन्दलि सखी . .[1] शा लुनीहि
कोपाङ्कुरं चरण . . . . [2]तिथिः स्याम्।
पश्य प्रसीद चरमाचलचूलचुम्बि
बिम्बं विधो[3]र्लवलपाण्डुरमस्तमेति ॥

३८२

अहो दिव्यं चक्षुर्वहसि तव सापि[1] . . . .
. . . (fol 57b)मयाङ्कं युवतिषु वपुः संक्र[2] . . .

---

३८० *Skm II 248 (अमरोः) Sbhv 2112 (anon) Śp 3715 (अमरुकस्य) *Sml B 150a (Amaru) Sāhityad p 81 (anon) Jayaratha ad As p 14 (anon) *S-Mukt I 39 (anon) Hemac p 70 (anon) *S-Prab 61 (anon)
[1] MS °तस्मिन् श° [2] Sbhv, Śp, Amaru, Hemac, Jayar, S-Prab च, Skm, Sāhityad °रन्योन्यस्य हृदि [3] The other texts have दम्पत्योः शनकैर°, S-Mukt continuing पागवलितामि°
[4] MS क्लि see Introduction [5] Amaru, Śp., S-Prab स
[6] Skm, Sāhityad °सक्त [7] Skm also (B), Hemac हं, Sbhv कौतूहलः, Śp कण्ठग्रहो ऽनुष्ठितः

३८१ [1] Aksaras lost (खट्ट and योर्न सदा? °वृथा?) [2] MS र्स
[3] MS. here inserts ꣸ twice (near the hole for the string)

३८२ [1] Two doubtful aksaras, the next seven are lost see Exegetical Notes [2] The next five aksaras are lost see Notes

. . नाभिज्ञानं कथमितरथा पश्यति पुरो
भवानेकस्तस्याः प्रतिकृतिमयीरेव[1] रमणीः॥
मनोविनोदकस्य ॥

३८३

प्रिये मौनं [मुञ्च श्रुतिरमृतधारां पि]बतु मे
दृशावुन्मील्येतां भवतु जगदि[न्दीव]रमयम् ।
प्रसीद प्रेमापि प्रशमयतु निःशेषमधृती
रभूमिः[4] कोपानां ननु निरपराधः परिजनः ॥
हिम्बोकस्य ॥

*Skm ii 243 (डिम्बोकस्य)

३८४

कोपस्त्व[या यं]दि कृतो मयि[2] पङ्कजाक्षि
सो ऽस्तु प्रियस्तव किमस्ति[3] विधेयमन्यत् ।
आश्लेषमर्पय मदर्पितपूर्व[मुच्चै[4]]
रुच्चैः समर्पय मदर्पितचुम्बनं च ॥
शतानन्दस्य ॥

Amaru, 133
Śṛngāratilaka, 23
*S Ratnak v 324 (anon)

३८५

सखि कलितः स्खलितो . . सौ[1] नैव प्रणाममात्रेण ।
चिरमनुभवतु भवत्या बाहुलताबन्धनं धूर्तः ॥
गोनन्दस्य ॥

---

३८२ [1] MS. here inserts पङ्क पङ्क (?) (near the hole for the string)

३८३ [1] These four aksaras are partly legible in the MS [2] These two aksaras are partly legible in the MS [3] MS नेः (nih) [4] MS मेः

३८४ [1] Amaru, *Śrngārat* हृ [2] Amaru, *Śrngārat* यदि, *S -Ratnak* यदि क्षतो हृदि. [3] Amaru, *Śrngārat* च [4] Two aksaras lost in MS owing to homœoteleuton [5] MS र्पे

३८५ [1] *Sic* MS , with two aksaras lost or, if the space is insufficient, omitted Should we read °तो ऽसौ शाठ्यो ? Cf 394*b*

३८६

जाते केलिकलौ कृते कमितरि व्यर्थानुनीतौ चिरा
न्माने म्लायति मन्मथे विकसति[1] क्षीणे . धौ[2] ऽनेहसि ।
मायास्वापमुपेत्य तन्निपुणया निद्रान्ध्यमाचेष्टितं
मानम्लानिरभून्न येन च न चाप्यासीद्रहःखण्डनम् ॥

३८७

कथंचिन्नैदाघे दिवस इव कोपे विगलिते
प्रसन्नौ[1] . . यां तदनु च निशायामिव शनैः ।
स्मितज्योत्स्नारम्भक्षपितविरहध्वान्तनिवहो
मुखेन्दुर्मानिन्याः स्फुरति कृतपुण्यस्य सुरते[2] ॥

३८८

Sbhv 1160 (चमरुकस्य ?) Śp 3542 (कस्यापि)

मानव्याधिनिपीडिताहमधुना शक्नोमि तस्यान्तिकं[1]
[नो ग] (fol 58a) न्तुं न सखीजनो ऽस्ति चतुरो यो मां बलान्नेष्यति ।
मानी सो ऽपि जनो न लाघवभयादभ्येति मातः[3] स्वयं
कालो याति चलं च जीवितमिति क्षुण्णं मनश्चिन्तया[4] ॥

३८९

Sbhv 1163 (बुद्धकस्य) *Sml B 103b (वर्धुकस्य)

यावन्नो सखि गोचरं नयनयोरायाति ता[व]द्द्रुतं
गत्वा ब्रूहि यथाद्य[1] ते दयितया मानः समालम्बितः ।

---

३८६ [1] MS ते (ti) [2] वो ? क्रुधो to be read ? [3] MS त्व

३८७ [1] Sic ? or न्नौ ? The next two aksaras are lost read जातायां or प्राप्तायां ? [2] MS भे

३८८ [1] Aksara partly lost [2] MS °टार [3] MS च:
[4] MS °तपा

३८९ [1] MS द्य

दृष्टे धूर्तविचेष्टिते तु दयिते तस्मिन्नवश्यं[1] मम
स्वेदाम्भःप्रतिरोधिनिर्भरतरंस्मेरं मुखं जायते ॥

३९०

दुष्टा मुष्टिभिराहता हृदि नखैराचोटिता[1] पार्श्वयो
राकृष्टा कवरीषु गाढमधरे सीत्कुर्वती खण्डिता ।
त्वत्कृत्यं त्वदगोचरेऽपि हि कृतं सर्वं मयैवाधुना
मामाज्ञापय किं करोमि शंरले भूयः सपत्न्यास्तव ॥

३९१

सुतनु जहिहि मौनं[1] पश्य पादानतं मां
न खलु तव[2] कदाचित्कोप एवंविधोऽभूत् ।
इति[3] निगदति[4] नाथे तिर्यगामीलिताक्षी
नयनजलमनल्पं मुक्तमुक्तं न किंचित् ॥

For refl see below

३९२

चेतस्यङ्कुरितं विकारिणि दृशोर्द्वन्द्वे द्विपत्त्रायितं
प्रायः पल्लवितं वचःस्वपरताप्रत्यायमानादिष[2] ।

---

३८९ [1] MS स्य [2] *Sbhi* °नो.

३९० [1] *Sic* MS (for च्छो ?) [2] MS स

३९१ **Skm* II 250 (अमरोः) *Sbhv* 1600 (कस्यापि) *Śp* 3577 (कस्यापि) **Sml P* 89*a* (अमरूकस्य) **Sml B* 108*b* (Amaru) **Saml* 151 (anon) Amaru, 39 *Sāhityad* p 98 (anon) **S-Ratnak* (only *a*) v 12 (anon) With *b* cf Bharata's *Nāṭyaśāstra* XV 67*a* [1] *Skm*, *Sāhityad*, *Sml B* कोप ; *S-Ratnak* जहिहि तरुणि कोप, *Sbhv*, *Śp*, *Sml P* मान [2] *Śp* तव न खलु [3] MS ते (*ti*) [4] *Sml P* °दित

३९२ [1] MS द्व [2] *Skm* वचस्युपचितं प्रौढं क[illegible]

तत्तत्कोपविचेष्टिते कुसुमितं पादानते तु प्रिये
मानिन्याः [फलितं] न मानतरुणा पर्यन्तवन्ध्यायितम् ॥
राजशेखरस्य ॥

३९३

*Skm II 236 (मनोकस्य)

कियन्मात्रं गोत्रस्खलितमपराधश्चरणयो
श्चिरं लोठत्येष प्रहवति[3] न मानाद्विरमसि ।
रुषं [मुञ्चामुञ्च प्रियमनुगृहाणा]यतिहितं
शृणु त्वं यद्ब्रूमः प्रियसखि नखं मा कुरु नदीं[5] ॥

३९४

दैवादयं यदि जनो विदितो ऽपराधी
दासोचितैः परिभवैरयमेव शास्यः ।
एषा[1] कपोलफलके ऽ . . . . . .
. . . . (fol 58b) बाष्पजलप्रणालैः[3] ॥

३९५

कृत्वागः स च नागतो ऽपि किमपि व्यक्तं मनो मन्यते
तत्कासे कमुपैमि जङ्गमवने को मामिहाश्वासयेत् ।
इत्युक्त्वाश्रुगलन्मुखी विटसखी ध्वस्ता विस . . .
. . . .[2] रसि कृतात्यन्तं प्रिया रोदिता[3] ॥
वल्लणस्य ॥

---

३९२ [1] *Skm* नु [2] MS पि

३९३ [1] *Skm* ०द्धं च [2] *Skm* लोचत्ये (A.) and लोठत्ये (B) [3] *Skm* प्रहरति [4] The MS retains traces of these four aksaras [5] *Skm* न माने कुरु मति ; correct MS to मुखं मा . ? Cf 394 *c-d*

धुंकस्

३९४ [1] This aksara is partly defaced in the MS [2] MS पु [3] Regarding the sense of the lost aksaras see Exegetical Notes

ज ३

३९५ [1] MS सु [2] The missing syllables may have been something like विस]वादिता । शोकोन्मत्तसखीगणो[रसि [3] MS (for ०ति or even ऽरादित (see Lexx) ?)

[4] MS n

३८९

३९६

कपोलं पक्ष्मभ्यः कलयति कपोलात्कु[1]चतटं
कुचान्मध्यं मध्यान्नवमुदितनाभीसरसिजम्[2] ।
न जानीमः [किं नु क्व[3] सुकृतमनेन व्यवसि[4]]तं
यदस्याः प्रत्यङ्गं नयनजलबिन्दुर्विहरति ॥

*Skm II 140
(नरसिंहस्य)

३९७

विकिर नयने मन्दच्छायं भवत्वसितोत्पलं
वितर दयिते हासज्योत्स्नां निमीलतु पङ्कजम् ।
वद सुवदने लज्जामूका भवन्तु शिख[ण्डिन]ः[1]
परपरिभवो मानस्थानैर्न मानिनि सह्यते ॥

३९८

अयं धूर्तो मायाविनयमधुरा[1]दस्य चरिता[2]
त्सखि[3] प्रत्ये[4]षि त्वं प्रकृतिसरले पश्यसि न किम् ।
कपोले यल्लाक्षा[5]रसबहलभां[6]गप्रणयिणी
मिमां धत्ते मुद्रामनतिचिरवृ[7]त्तान्तपिशुनाम् ॥

*Skm II 117
(सोल्लोकस्य)

३९९

अप्राप्तकेलिसुखयोरतिमानरुद्ध
संधानयो रहसि[1] जातरुषोरकस्मात् ।

---

३९६ [1] *Skm* करप्राणात्स्तन (A) and कपोलात्स्तन (B) [2] *Skm* स्तनान्नाभि नाभेर्घनजघनमेत्य प्रतिमुहुः [3] The MS retains traces of these three aksaras, *Skm* क्व सुष्ठतमनेन (A) and क्व नुदनेन (B) [4] MS षिं.

३९७ [1] So to be read? or शिखाबलाः ?

३९८ [1] *Skm* वा (?) [2] *Skm* वचसः [3] MS खे (*khi*) [4] MS त्वे [5] MS च्या [6] *Skm* रा [7] MS. त

३९९ [1] MS से (*si*)

यूनो[1]र्मिथो ऽभिलषतो[2]ः प्रथमानुनीतिं
भावाः प्रसादपिशुनाः क्षपयन्ति निद्राम् ॥

सोन्नोकस्यैतौ ॥

४००

*Skm II 208 (कस्यचित्)

श्रवसि न कृतास्ते तावन्तः[1] सखीवचनक्रमा
श्चरणपतितो ऽङ्गुष्ठाग्रेणाप्ययं न हतो[2] जनः ।
कठिन[3]हृदये मिथ्यामौ[4]नव्रतव्यसना[5]दयं
परिजनपरित्यागोपायो न[6] मानपरिग्रहः ॥

४०१

*Skm II 221

न मन्दो वक्त्रेन्दुः श्रयति न ललाटं कुटिलता[1]
न नेत्राब्जं रज्यत्य[2]नुषं[3]जति न[5]भ्रूरपि भिदाम् ।
इदं तु प्रेयस्या(fol 59a)ः प्रथयति रुषो ऽन्तर्विकसिताः[6]
शते ऽपि प्रश्नानां यदभिदुरमुद्रो ऽधरपुटः ॥

वैद्यधन्यस्य ॥

४०२

Śp 3536 (कस्यापि)

तत्तद्वदत्यपि यथावसरं[1] हसत्य
प्यालिङ्गने ऽपि न निषेधति चुम्बने ऽपि ।
किन्तु प्रसादनभयादति[2]निह्नुतेन
कोपेन[3] को ऽपि निहितो[4] ऽद्य रसावतारः ॥

महाव्रतस्य ॥

---

३९९ [1] MS पूरो [2] MS षि

४०० [1] MS न्त्र: [2] MS भो read निहतो ? [3] MS repeats the न [4] *Skm* सौ [5] MS वा [6] *Skm* व

४०१ [1] *Skm* equally well ता [2] *Skm* also (A) च [3] *Skm* also (B) त [4] *Skm* also (A) स [5] MS ०नित [6] *Skm* ०लसितं [7] MS भे (*bhi*)

४०२ [1] MS र [2] *Śp* पि [3] Corrected from कौ [4] *Śp* वि

४०३

आश्लेषेण पयोधरप्रणयिनी[1] प्रत्यादिशन्त्या दृशं
दृष्ट्वाचाधरबद्धतृष्णां[2]मधरं निर्भर्त्सयन्त्या मुखम्।
ऊर्वोर्गाढ[3]निपीडनेन जघने पाणिं च रुन्धानया
पत्युः प्रेम न खण्डितं निपुणया मानो ऽपि नैवोज्झितः॥

४०४

दीर्घोच्छ्वा[1]सविकम्पिताकुलशिखा यत्र प्रदीपाः कुले
दृष्टिर्यैत्र च दीर्घजागरगुरुः कोपे मदीये तव।
विस्रम्भैकरसप्रसादमधुरा यत्र प्रवृत्ताः कथा
स्तान्यन्यानि दिनानि मुञ्च चरणौ सैवाहमन्यो भवान्॥

४०५

परीरम्भारम्भः स्पृशति परमिच्छां[1] न तु भुजौ
भजन्ते विज्ञानं न तु गिरमनूरोधविधयः।
मनस्विन्याः स्वैरं प्रसरति निशासीमसमये
मनः[2] प्रत्यावृत्तं कमितरि कथंचिन्न तु वपुः॥

चक्रपाणेः॥

४०६

[1]अद्योद्यानगृहाङ्गणे सखि मया स्वप्नेन लाक्षारुणः
प्रोत्क्षिप्तो ऽयमशोकदोहदविधौ पादः क्वणन्नूपुरः।
तावत्किं कथयामि केलिपटुना निर्गत्य कुञ्जोदरा
दज्ञातोपनतेन तेन सहसा मूर्ध्नैव संभावितः॥

मधुकूटस्य॥

---

४०३ [1] MS ष्णु [2] MS ना [3] MS न

४०४ [1] MS च्छ्वा

४०५ [1] MS मे (*mi*) [2] MS मः

४०६ [1] Cf the verse अद्योद्याने in the *Karnasundarī* I 36, plainly based upon this

४०७

*Skm II 201 (अमरोः) Sbhv 1118 (कस्यापि)

सखि स सुभगो मन्दस्नेहो मयीति[1] न मे व्यथा
विधिपरिणतं[2] यस्मात्सर्वो जनः सुखमश्नुते ।
मम तु हृदये[3] संतापो[4]ऽयं प्रिये[5] विमुखे ऽपि यत्
कथमपि हतव्रीडं[7] चेतो[8] न याति विरागिताम्[9] ॥

४०८

For reff see below

भ्रूभे(fol 59b)दे[1] रचिते ऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते[2]
रुद्धायामपि वाचि सस्मितमिदं[3] दग्धाननं जायते ।
कार्कश्यं[4] गमिते ऽपि चेतसि तनू[5] रोमाञ्चमालम्बते
दृष्टे निर्वहणं भविष्यति कथं मानस्य[8] तस्मिञ्जने[9] ॥

४०९

Vāmana *ad* III 2, 14 (anon) *Kāvyapr ad* IV 42 (anon) *Kāvyaprad ad* IV 20 (anon)

प्रेयान्[1] सो ऽयमपाकृतः सशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद्यावन्न यात्यात्मना[3] ।
तावत्प्रत्यु[त] पाणिसंपुटलसन्नी[वी]निबन्धं[5] धृतो
धावित्वेव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः ॥

---

४०७ [1] *Sbhv* मे [2] *Skm*, *Sbhv* विरचि [3] *Skm* मनसः, *Sbhv* सततं [4] MS यो [5] *Skm*, *Sbhv* जने [6] *Skm* चण [7] MS ड [8] MS तौ [9] *Sbhv* ग

४०८ **Skm* II 227 (अमरोः) *Sbhv* 1580 (भदन्तारोग्यस्य) **Sml P* 85*a* (भदन्तारोग्यस्य) **Sml B* 103*a* (भदन्तारोग्यस्य) *Śp* 3540 (भदन्तवर्मण) Amaru, 28 **S-Mukt* I 44 (anon) **S-Ratnak* V 318 (anon) *Sāhityad* p 81 (anon) [1] *Śp*, Amaru, *Sml*, *S-Ratnak*, *S-Mukt* ०भङ्गे [2] *Skm* also (A) च्य [3] *S-Ratnak* सद्वार्या [4] MS स्विं [5] *S-Mukt*, *S-Ratnak* मु [6] MS स्य [7] MS न [8] Amaru also नामास्य [9] *S-Ratnak* चणे, MS ०न् ज०

४०९ [1] MS प्रिप्रा [2] MS षा [3] *Kāvyapr*, *Kāvyaprad*, Vāmana ०त्वमना [4] MS ०त्या [5] MS न्ध

४१०

गते प्रेमाबन्धे हृदयबहुमाने विगलिते
निवृत्ते सद्भावे जन इव जने गच्छति पुरः ।
तदुत्प्रे[क्ष्योत्प्रे]क्ष्यं प्रियसखि गतांस्तांश्च दिवसा
न्न जाने को हेतुः स्फुटति शतधा यन्न हृदयम् ॥

For reff see below

४११

सुतनु नितम्बस्तव पृथुरक्ष्णोरपि नियतमर्जुनो महिमा ।
मध्यः सबलिरिदानीं मान्धाता कुचतटः क्रियताम् ॥

४१२ दामोदरस्य ॥

दृष्टे लोचनवन्मनाङ्मुकुलितं चाग्रे गते वक्त्रव
न्न्यग्भूतं बहिरास्थितं पुलकवत्संस्पर्शमातन्वति ।
नीवीबन्धवदागतं शिथिलतामाभाष[मा]णे ततो
मानेनापसृतं ह्रियेव सुदृशः पादंस्पृशि प्रेयसि ॥

For reff see below

---

४१० *Skm II 893 (अमरोः) Sbhv 1141 (विज्जकायाः) Śp 3545 (अमरुकस्य) Amaru, 43 S-Muktāv XIV 7 (anon) S-Mukt X 14 (anon) [1] Skm, Śp, Amaru, Subhās, S-Mukt प्रणय [2] Sbhv पि [3] Subhās, S-Mukt धवे [4] Sbhv तथा चैवोत्प्रेक्ष्य, [5] MS °तास्ते च दिवसा [6] Skm, Sbhv, Śp, Amaru, Subhās, S-Mukt दल [7] MS यं न

४१२ *Skm II 246 (कस्यचित्) Śp 3581 (कस्यापि) Sarasvatīk ad V 138 and 185 (anon) *Sml P 89a (कस्यापि) *Sml B 109a (अमरुकस्य) *Sabhyāl 30a (Samasyā by Bhīmasena) Hemac p 86 (anon) [1] Sarasvatīk also (185) °वर्त्मनामु [2] All other texts पार्श्वस्थिते, Hemac with चक्रवत् [3] Skm, Śp, Sarasvatīk, Sml P, Sabhyāl, Hemac सि [4] Sarasvatīk also (185) °तत्स्पर्शं, elsewhere स्पर्शे समा° [5] Skm, Śp °ता स, Sml P reads सवीक्ष्यमाणे [6] MS here inserts त्त, Śp reads चण, Sml P चणात् [7] MS य [8] Sarasvatīk ग [9] Sarasvatīk also (185) °तनोरङ्घ्रि

॥ विरहिणीव्रज्या ॥[1]

४१३

तापस्तन्वङ्गमाहितासु बिसिनीष्वङ्गारकारायते
बाष्पः पाण्डुकपोलयोरुपरि वैपुल्यात्कर्पूरायते[1] ।
किं चास्या मलयद्रुमद्रवभरैर्लिम्पामि यावत्करं
तावच्छ्वाससमीरणव्यतिकरैरुद्धूलिरासीत्करः ॥

अच्युतस्य ॥

४१४

*Skm II 512 (विद्यायाः)

देवेन प्रथमं जितो ऽसि[1] शशभृल्लेखाभृतानन्तरं
बुद्धेनोद्धतबुद्धिना स्मर ततः कान्तेन पान्थेन मे ।
त्यक्त्वा तान्वत हंसि मामतिकृशां बा(fol 60a)लामनाथां स्त्रियं
धिक्त्वां धिक्तव[2] पौरुषं[3] धिगुदयं धिक्कार्मुकं धिकछरान्[4] ॥

श्रीराज्यपालस्य ॥

४१५

*Skm II 196 (अमरोः)

कर्णे यन्न कृतं सखीजनवचो यन्नादृता बन्धुवा
क्यत्पादे[1] निपतन्नपि प्रियतमः कर्णोत्पलेनाहतः[2] ।
ते]नेन्दुर्दहनायते मलयजालेपः स्फुलिङ्गायते
रात्रिः कल्पशतायते बिसलताहारो ऽपि भारायते[3] ॥

---

[1] MS हे (hi)

४१३ [1] MS चु

४१४ [1] *Skm* also (A) पि [2] MS कु [3] MS ष

[4] These three aksaras partly lost in MS

४१५ [1] MS पयो [2] MS लो [3] *Skm* also (A) हा

४१६

आहारे विरतिः समस्त[1]विषयग्रामे निवृत्तिः परा
नासाग्रे नयनं य[2]देतदपरं यच्चैकतानं[3] मनः ।
मौनं चेदमिदं च शून्यमखिलं[4] यद्विश्वमाभाति ते[5]
तद्ब्रूयाः सखि योगिनी किमसि भो किं वा वियोगिन्यसि ॥

For refl see below

४१७

वत्से[1] नैते पयो[दा][2]: सुरपतिकरिणो नो वकाः कर्णशङ्खाः[3][4]
सौदामिन्यो ऽपि नैताः कनकमयमिदं भूषणं कुम्भपीठे[5] ।
नैतत्तोयं नभस्तः[6] पतति मदजलं श्वासवाता[7]वधूतं
तत्किं मुग्धे वृथा[8] त्वं मलिनयसि मुखं प्रावृडित्यश्रुपातैः ॥

At pp 39-40 (anon) *S-Hārāv C 348 (anon)

४१८

नाकानोकहसंभवैः सखि सुधाच्योतल्लवैः पल्लवैः
पल्यङ्कं क्षणमात्रमा[1]स्तृणु [. . . .][2]पधानीकुरु ।

---

४१६ *Skm II 122 (राजशेखरस्य) Sbhv 3485 (anon) Śp 3423 (राजशेखरस्य) *Sml P 60b (राजशेखरस्य) *Sml B 66a (राजशेखरस्य) *Saml 89 (anon) *Padyāv 237 (कस्यचित्) Sāhityad p 112 (anon) Sāhityak ad IV 19 (anon) Sarasvatīk ad IV 42 (anon) *S-Hārāv C 347 (राजशेखरस्य) [1] Sbhv, Śp, S-Hārāv ग्र [2] Sāhityad, Sāhityak, S-Hārāv त; Sml P यद्दियद्० [3] Śp, S-Hārāv ०निष्ठं, Sml P ०श्चैक्तिनंश्च (?). [4] Sāhityad ०धुना [5] Sml P ०भाषसे [6] Skm च, Sml P ब्रूयास्त्व [7] MS ग

४१७ [1] At, S-Hārāv बाले [2] MS ने [3] Aksara nearly lost [4] MS ०स(श्र?)खा., At ०पूराः [5] At वारणाना; S-Hārāv मण्डनं कु० [6] S-Hārāv विकीर्ण [7] At वारिधारा [8] S-Hārāv मुधा

४१८ [1] MS गात्र(श्र?) सा(शा?) [2] Four aksaras omitted.

नो चेत्स्नेहरसावसेकविकसज्ज्वालावलीदारुणो
दारुणीव न मे विरंस्यति दहन्नङ्गान्यनङ्गानलः ॥

चक्रस्य ॥

४१९

असौ गतः सौगत एव यस्मा
त्कुर्यान्निरालम्बनतां ममैव ।
सखि प्रियस्ते क्षणिकः किमन्य
न्निरात्मकः शून्यतमः स वन्द्यः ॥

श्रीभोज्यदेवस्य ॥

४२०

पूर्णं कपोलतलमश्रुजलैर्यदस्या
यद्धूसरं वदनपङ्कजमायताक्ष्याः ।
अर्धाविदग्धगलदङ्गरसावसिक्त
मां (fol 60b) द्रैन्धनं तदिव भस्मकणानुयातम् ॥

४२१

अयं धारावाहस्तडिदियमियं दग्धकरका
स चायं निर्घोषः स च रववशो भेकनिचयः ।
इतीव प्रत्यङ्गप्रथितमदनाग्निं कृशतनु
र्घनश्वासोत्क्षेपैर्ज्वलयति मु[हुं]र्मृत्युवशिनी ॥

---

४१८ [1] MS षे [2] MS रु [3] MS व

४१९ [1] *Sic* MS , as in 462

४२० [1] MS ज्ञा [2] MS षि [3] In the MS this aksara has lost its vowel [4] MS द्रै

४२१ [1] MS स्वा [2] This aksara is partly lost [3] MS °षि(ष्रि ?)नी

४२२

प्रम्लानं पीनस्तनजघनसङ्गादुभयत
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम् ।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः संतापं वदति बिसिनीपत्त्रशयनम् ॥

Jon ff below

४२३

मनो रागस्तीव्रं व्यथयति विसर्पन्नविरतं
प्रमाथी निर्धूमं[2] ज्वलति विधुतः पावक इव ।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित[3] इतो
न मां त्रातुं तातः[4] प्रभवति न चाम्बा न भवती ॥

Malatim Kavyapr VIII 2(in Kavyapra VIII 2(in Hemac p (anon)

४२४

एतस्या विरहज्वरः[1] करतलस्पर्शैः परीक्ष्यो न यः[2]
स्निग्धेनापि जनेन दाहभयतः[3] प्रस्थंपचैः पाथसाम् ।

For ref see below

४२२ *Ratnāvalī*, II 38 *Śp* 3401 (श्रीहर्षस्य) **Sml B* 64*b* (श्रीहर्षस्य) *Kāvyapr ad* VIII 11 (anon) *Dhvanyāl ad* I 17 (anon) *Kuvalay ad* 66 (anon) *Kāvyaprad ad* VIII 11 (anon) *Aucityav ad* 11 (श्रीहर्षस्य) **S-Hārāv* C 369 (रत्नावलीतः) **S-Mukt* III 88 (anon) *Padyavac* V 8 (कालिदासस्य) [1] *Ratn*, *Kāvyapr*, *Kuvalay*, *Padyavac* म्रि [2] *S-Mukt*, *Padyavac* °न्यस्त [3] *Dhvanyāl*, *Kuvalay* प्रशिथिल-भुजा [4] *Ratn*, *Kuvalay* नलि [5] MS च

४२३ [1] Other texts विषमिव विसर्पत्व° [2] *Mālatīm* also मो, so *Kāvyaprad* [3] MS त: [4] Hemac तातस्त्रातु

४२४ *Bālarām* V 11 **Skm* II 163 (योगेश्वरस्य) **Sml P* 59*b* **Sml B* 65*a* *Aucityav ad* 14 **S-Hārāv* C 359 [1] *Skm* एतस्या (B °स्याः) स्मरस, so *Bālar* and *Aucityav* (with °स्याः, as in *Skm* B) [2] *Skm* ऽद्य न: [3] *Sml P*, *S-Hārāv* स्निग्धेनापि सखीजनेन [4] *Bālar* शोषप्रद.

निःशङ्कीकृ[1]तचन्दनौ[2]षधिविधावस्मिंश्चमत्कारिणो
लाजस्फोटममी स्फुटन्ति मणयो विश्वेऽपि हारस्रजाम्[4]॥

४२५

Viddhaś II 14
*Skm II 123
*Sabhyāl III 24

यत्ताडीदलपाकपाण्डु वदनं यन्नेत्रयोर्दुर्दिनं[1]
गण्डः पाणिनिषेवणाच्च यदयं संक्रान्तपञ्चाङ्गुलिः[2]।
गौरी क्रुध्यतु वर्तते यदि न ते तत्कोऽपि[3] चित्ते युवा
धिग्धिक्तां सहपांशुखेलनसखीं[4]लोके[5]ऽपि यन्निह्नवः॥

राजशेखरस्यैतौ ॥

४२६

*Skm II 297 (राजशेखरस्य)
*Sml B 102a (,,)

केयूरीकृतकङ्कणावलिरसौ कर्णान्तिकोत्तंसित[1]
व्यालोलालकपक्ष[2]तिः पथि पुरो बद्धाञ्जलिः पृच्छति ।
यावत्किंचिदु[3]दन्तमात्मकमितुस्तावत्स[4] एवेत्यथ
व्रीडाव[5]क्रितकण्ठनालमबला कैः कैर्न[6] भिन्ना रसैः॥

४२७

Viddhaś III 23
*Skm II 507 (राजशेखरस्य)

प्रियवि (fol 61a) रहमहोष्मामर्मरां[1]मङ्गलेखा
मपि हतकहिमांशो मा स्पृश क्रीडयापि ।

---

४२४ [1] *Skm* निर्बीजी, *Bālar*, *Aucityaı* निर्वीर्यी, *S-Hārāv* नि.शेषी [2] MS नो [3] *Skm* ॰धौ तस्मिंश्च च (B ट), *Bālar*, *Sml P*, *Aucityaı*, *S-Hārāv* तस्मिंस्तड [4] *Sml P*, *S-Hārāv* जः

४२५ [1] *Viddhaś*, *Sabhyāl* यद्दुर्दिनं नेत्रयोः [2] *Viddhaś*, *Sabhyāl* ॰र्यत्प्रेङ्खोलितकेलिपङ्कजदलश्वासाः प्रसर्पन्ति च [3] MS प [4] *Viddhaś* also खलु [5] *Skm* ॰वर्गे

४२६ [1] *Skm* कर्णावतंसीकृ. [2] MS ञ्च, so also *Skm* (A) [3] MS द्व [4] MS तुः ता [5] MS च [6] MS र्न्न

४२७ [1] *Skm* ॰ष्माम्बुर्मुरा and ॰ष्माम्बुर्मुरा, *Viddhaś* ॰ष्मामुर्मुरा (and ॰र्मरा)

इह हि तव लुठन्तः प्रोषपीडां[1] भजन्ते
दरजठरमृणालीकाण्डमुग्धा[3] मयूखाः ॥

४२८

यद्दौर्बल्यं वपुषि महती स[र्वतश्चास्पृ[1]]हा य
न्नासालक्ष्यं[2] यदपि नयनं मौन[मे[3]]कान्ततो यत् ।
एकाधीनं कथयति मनस्तावदेषा दशा ते
को ऽसावेकः कथ[य[3]] सु[4]मुखि ब्रह्म वा वल्लभो वा ॥

लक्ष्मीधरस्य ॥

*S'ʼn II 125

४२९

निकामं क्षाम[ाङ्गी सर[1]]सकदलीगर्भसुभगा
कलाशेषा मूर्तिः शशिन इव नेत्रोत्सवकरी ।
अवस्थामापन्ना मदनदहनोद्दाह[2]विधुरा
मियं नः कल्याणी रमयति मतिं[3] क[म्पयति च[1] ॥]

भवभूतेः ॥

Mālatīm II 3
Sarasvatīk ad
IV 62 (anon)
Ak p 324
(anon)

४३०

निद्रे भद्रमवस्थितासि कुशलं संवेदने किं तव[1]
क्षेमं ते सखि निर्वृते[2] ननु समं कान्तेन यूयं गताः ।
किं चान्यत्प्रियसंगमे ऽद्य[3] चलितो गच्छन्वि[4]पद्वत्सलो
मूर्छाविस्मृत[5]वेदनापरिजनो दृष्टो ऽस्मदीयो न वा ॥

श्रीरविन्दस्य ॥

*Skm II 298

---

४२७ [1] Skm प्रोषभार [2] Viddhaś also ०जरठ, see 66d and note 8 to 500 [3] Skm, corrected from मुग्धकाण्डा

४२८ [1] Four aksaras lost [2] Skm चं [3] Aksara omitted [4] Skm (A) स

४२९ [1] Aksaras wholly or partly lost [2] Mālatīm also म [3] Mālatīm, Ak, Sarasvatīk ०नः

४३० [1] MS तव कि [2] MS त्ते [3] Skm म [4] Aksara वि partly lost in MS [5] Skm ति [6] MS श्रा

४३१

मध्येसद्म समुद्गता तदनु च द्वारान्तरालं गता
निर्याताथ कथंचिदङ्गणमपि [प्रे]यांस्तु नालोकितः।
हंहो वायस राजहंस शुक हे हे शारिके कथ्यतां
का वार्त्तेति मृगीदृशो विजयते बाष्पान्तरायं वचः॥

चित्राङ्गस्य॥

४३२

Viddhaś III 17
Hemac comm p 7 (anon)
Kkbh ad v 1

दरदलितहरिद्राग्रन्थिगौ[रे शरीरे]
स्फुरति विरहजन्मा को ऽप्ययं पाण्डुभावः।
बलवति सति यस्मिन् सार्धमावर्त्य हेम्ना
रजतमिव मृगाक्ष्याः कल्पितान्यङ्गकानि॥

राजशेखरस्य॥

४३३

प्रिये प्रयाते हृदयं प्रयातं
निं (fol 61b) . . . चेतनया सहैव।
निर्लज्ज हे जीवित न श्रुतं किं
महाजनो येन गतः स पन्था॥

धर्मकीर्त्ते.॥

---

४३१ [1] MS या, the aksara प्रे is lost

४३२ [1] *Viddhaś* also नख, so Hemac, *Kkbh* [2] Four aksaras lost in MS

४३३ [1] MS ने (ni) [2] In the MS three aksaras and the vowel of चे are lost

४३४

बाष्पश्चक्षुषि नाञ्जनं करतले वक्त्रं न लीलाम्बुजं
गण्डे पाण्डरिमा न पत्त्र[1]मकरी श्वा[सा[2]] मुखे न स्मितम् ।
इत्थं यस्य वियोगयोगविधुरं मुग्धे तवेदं वपु
र्नो जा[3]ने कतमः स पुष्पधनुषा नीतः प्रसादश्रियम् ॥

भ्रमरदेवस्य ॥

४३५

कस्मादिदं नयनमस्तमिताञ्जनश्रि
वि[1]श्रान्तपत्त्र[2]रचनौ च कुतः कपोलौ ।
शृङ्गारवारिरुहकाननराजहंसि
कस्मात्कृशासि[3] विरसासि मलीमसासि ॥

विष्णुहरेः ॥

४३६

अरतिरियमुपैति मां न[1] निद्रा
गण[यति त][2]स्य गुणान्मनो न[3] दोषान् ।
विगलति[4] रजनी न संगमाशा[5]
व्रजति तनुस्तनुतां न चानुरागः ॥

प्रवरसेनस्य ॥

For 1 ff see below

---

४३४ [1] MS यन्त्र [2] Aksara lost in MS [3] MS र्जा

४३५ [1] Two aksaras partly lost (वि doubtful) [2] MS °यन्त्र [3] MS नि

४३६ **Skm* II 185 *Sbhv* 1113 (कस्यापि) *Śp* 3427 (बिल्हणस्य) **Padyāv* 213 (कङ्कस्य) **S-Ratnak* v 216 (anon) [1] MS नि [2] *Skm* also गमयति (A); *Sbhv* प्रथयति, MS has lost three aksaras [3] *Sbhv* मनो गुणान्न [4] *Skm*, *Sbhv*, *Padyāv*, *S-Ratnak* विरमति [5] MS सा

४३७

असावहं लोहमयी स यस्याः
क्रूरः सखि प्रस्तर . .[1] कान्तः ।
आकर्षकद्रावकचुम्बकेषु
नैको ऽप्यसौ भ्रामक इत्यवेहि ॥

शब्दार्णवस्य ॥

४३८

*Skm II 277 नावस्था वपुषो[1] ममेयमवधेरुक्तस्य नातिक्रमो
नोपालम्भपदानि वा[प्यकरुणे तचा[2]]भिधेयानि ते ।
प्रष्टव्यः शिवमालि केवलमसौ कच्चिद्भवद्गोचरे
नायातं मलयानिलैर्मुकुलितं कच्चिन्न चूतैरिति ॥

वाक्कूटस्य ॥

४३९

स्वप्ने ऽपि प्रियसंगमव्य . . . .[1] ते न निद्रागम
श्चित्रेणालिखितुं तमिच्छति यदि[2] स्वेदः सपत्नीजनः ।
मुग्धेयं कुरुते ऽथ तद्गुणकथां मन्युर्गिरामर्गलः
प्रायः पुण्यदिनानुभावबलनादाशंसितं सि . .[3] ॥

(fol 62*a*) . . . ॥

४४०

व्योमश्रीहृदयैकमौक्तिकलते मातर्बलाकावलि
ब्रूयास्त्वं जनमादरः खलु महान् प्राणेषु कार्यस्त्वया ।

---

४३७ [1] Two aksaras lost (एव ?)

४३८ [1] MS यो [2] *Skm* also (B) र, six aksaras are here lost

४३९ [1] Four lost aksaras (सनिनी शे ?) [2] MS दे (*di*)
[3] ति ? The next two aksaras are lost Read सिध्यति ?

एतां[1] म्लानिमुपागतां स्रजमिव त्यक्त्वा तनुं दुर्वहा
मेषा[2]हं स . . . . [3]तीव्रां वियोगव्यथाम् ॥

४४१

आदृष्टिप्रसरात्प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया
विश्रान्तेषु पथिष्वहःपरिणतौ ध्वान्ते समुत्सर्पति[4]।
दत्त्वैकं[5] सशुचा[6] गृहं प्रति पदं[6] पा[न्थस्त्रिय]ास्मिन् क्षणे
मा[7] भूदागत इत्यमन्दवलितोद्ग्रीवं[8] पुनर्वीक्षितम् ॥

सिद्धोकस्य ॥

For ref see below

४४२

*Skm II 126 (शब्दो(धो)कस्य)

श्वासास्ताण्डवितालकाः करतले सुप्ता कपोलस्थली
नेत्रे बाष्पतरङ्गिणी परि[ण[1]]तः कण्ठे कलः पञ्चमः।
अङ्गेषु प्रथमप्रवृद्धफलिनी[2] लावण्यसंवादिनी
पाण्डिम्ना विरहोचितेन गमिता कान्तिः[3]कथागोचरम्[6]॥

राजशेखरस्य ॥

४४० [1] MS ता [2] MS षां [3] Eight aksaras lost in MS The sense might be given by स भवान् सहिष्यति कथ The remains of the first aksara do not, however, suggest भ

४४१ **Skm* II 290 *Sbhv* 1056 (अमरुकस्य) Amaru, 76 *Daśar ad* II 25 (अमरुशतके) **S-Mukt* x 4 (anon) **S-Hārāv* C 356 [1] Amaru also °रं प्रि [2] *Sbhv*, *S-Mukt* °च्छिन्ने, Amaru has both readings [3] MS स्व. [4] Amaru also °मीलति [5] *S-Hārāv* द्व [6] MS °मुधा, *Skm* यात्येव स्वनिवेशन प्रतिपथं The bracketed syllables have been lost. [7] MS, *S-Mukt* मा [8] *Sbhv*, Amaru, *Daśar*, *S-Mukt*, *S-Hārāv* °तया

४४२ [1] Aksara lost [2] MS ले (h) [3] *Skm* also °फलिनी [4] MS सम्पा [5] MS ब्रि [6] *Skm* कथाशेषतां, MS °गोरव

४४३

स्मितज्यो[त्स्ना[1]]दानादुपकुरु चकोरप्रणयिनी[3]
विधेहि भ्रूलीलां स्मरतु धनुषः पञ्चविशिखः।
अयि स्तोकोन्निद्रैर्नयनकुमुदैर्मोदय दिशो
विशेषास्ते मुग्धे दधतु कृतिनां चेतसि पदम् ॥
अपराजितरक्षितस्य ॥

४४४

Skm II 242 (अभिनन्दस्य)

किमिति[1] कवरी याह[क्षाह]ग्दृशौ किमकज्जले[3]
मृगमदमसीपत्त्रन्यासः[5] स किं न कपोलयोः[6]।
अयमयम (fol 62b) यं किं च क्लाम्यत्यसंस्मरणेन ते
शशिमुखि[8] सखीहस्तन्यस्तो विलासपरिच्छदः ॥

Sarasvatīk ad IV 7? (anon)

४४५

**Skm* II 293 (कस्यचित)

वारं वारमलीक एव हि भवान् किं व्याहृतैर्गम्यता
मित्युद्यम्य सुमन्दबाहुलतिकामुत्थापयन्त्या रुषा।
संक्रान्तैर्व[ल[2]]यैरलंकृतगलो युष्मद्वियोगोचितां
तन्वङ्ग्याः[3] प्रकटीकरोति तनुतां दृङ्के भ्रमन्वायसः ॥

---

४४३ [1] Aksara lost [2] Here something has been erased [3] MS णी [4] Here something has been erased [5] MS here inserts च

४४४ [1] MS here inserts ऌ five times [2] *Skm* रृ The bracketed aksaras are omitted in MS [3] *Skm* किमनञ्जने, MS लै corrected to ले [4] MS य (?) च [5] MS °न्यासः [6] *Sarasvatīk* न खलु लिखिताः पत्त्रावल्यः किमद्य° [7] MS शे (śi) [8] *Sarasvatīk* प्रियसखि

४४५ [1] *Skm* ज्ञ, MS दृ Concerning confusion between उद्यम् and उद्गम् *see* Bohtlingk & Roth *s v* यम् + उद् 10 [2] The damaged aksara looks more like ले than ल Perhaps some accidental stroke was added [3] MS ङ्ग्याः [4] *Skm* °ताम

४४६

पक्ष्माग्रग्रथिताश्रुबिन्दुविशरै[1]र्मुक्ताफलस्पर्धिभिः
कुर्वन्त्या हरहासहारि हृदये हारावलीभूषणम् ।
बाले बालमृणाल[नाल[2]]वलयालंकारकान्ते करे
विन्यस्याननमायताक्षि सुकृती[3] को ऽयं त्वया स्मर्यते[4] ॥

Śp 3414 (कस्यापि)
Daśa ad IV 15 (anon.)
**Saml* 86 (anon.)
**S-Ratnak* V 285 (anon.)

४४७

दहति विरहेष्वङ्गा[1]नी[र्घ्यां करोति[2]] समागमे
हरति हृदयं दृष्टः [स्पृष्टः[3]] करोत्यवशां तनुम् ।
क्षणमपि सुखं यस्मिन् प्राप्ते गते च न लभ्यते
किमपरमतश्चित्रं यन्मे तथापि स वल्लभः ॥

**Skm* II 200 (अमरुकस्य)

४४८

को[1] ऽसौ धन्यः [कथय सुभगे] कस्य गङ्गासरय्वो[2]
स्तोयास्फालव्यतिकरखलत्कारि कङ्कालमास्ते ।
यं ध्यायन्त्याः सुमुखि लिखितं कज्जलक्लेदभाञ्जि
व्यालुम्पन्ति स्तनकलशयोः पत्त्र[म[7]]श्रू[णयजस्रम्] ॥

**Skm* II 137 (कस्यचित्)

४४९

.[1] शेषेण च्छुरितकरया कुङ्कुमेनादधत्या
शोणच्छायां भवनबिसिनीहंसके कौतुकिन्या ।

---

४४६ [1] *Śp*, *Daśa*, *Saml*, *S-Ratnak* °भिव [2] Aksaras omitted [3] MS ति [4] *S-Ratnak* चिन्त्यते

४४७ [1] *Skm* also unmetrically (B) °हे ऽमा [2] Aksaras lost [3] Akṣaras omitted

४४८ [1] MS. कौ? [2] *Skm.* °सरस्वत्तो°, MS °य्वो [3] *Skm* also घन (A) [4] MS रे (ri) and म. [5] *Skm* also स [6] *Skm.* निय [7] Aksara omitted; the other bracketed aksaras lost.

४४९ [1] One syllable (किं? प्राक्?) lost. [2] MS. च्छरति.

कोकभ्रान्तिक्षणविरहिणी यन्मयाकारि हंसी
तस्यैतन्मे . .[1] (fol 63a) मुपनतं नाथ यत्ते वियोगः ॥

४५०

श्वासोत्कम्पतरङ्गिणि स्तनतटे धौताञ्जनश्यामलाः
कीर्यन्ते कणशः कृशाङ्गि किममी बाष्पाम्भसां बिन्दवः ।
किं चाकुञ्चितकण्ठरोधकुटिलाः श्रोत्रामृतस्यन्दिनो
हूंकाराः कलपञ्चमप्रणयिनस्त्रुट्यन्ति निर्यान्ति च ॥

४५१

Śp 3436 (पुष्टिकस्य)
*Subhāsita-samcaya xxviii 6 (anon)
*S -Ratnak x 217 and 289 (anon)
*S -Hārāv C 353 (पुष्टिकरस्य)

इदानीं तीव्राभिर्दहन इव भाभिः[1] परिगतो
ममाश्चर्यं सूर्यः किमु सखि रजन्यामुदयते[4] ।
अयं मुग्धे चन्द्रः[5] किमिति मयि तापं[6] प्रकटय[7]
त्यनाथानां बाले किमिह विपरीतं न भवति ॥

४५२

मा मुञ्चाग्निमुचः करान् हिमकरे प्राणाः क्षणं स्थीयतां
निद्रे मुद्रय लोचने रजनि हे दीर्घातिदीर्घा भव ।
स्वप्नासादितसंगमे प्रियतमे सानन्दमालिङ्गिते
स्वच्छन्दो भवतां भविष्यति पुनः कष्टो विचेष्टारसः ॥

---

४४९ [1] Two aksaras, no doubt फल, are here lost Regarding the sense see Exegetical Notes

४५० [1] MS ता [2] MS य

४५१ [1] *Subhās* ति [2] *Śp*, *S -Ratnak*, *S -Hārāv* वृ [3] *S -Hārāv* हा [4] *Śp*, *S -Samcaya*, *S -Hārāv* ति [5] *Subhās* सोमः [6] MS प [7] *Subhās* वितनुते [8] MS here inserts ष्ट

४५२ [1] MS रु [2] MS हि

४५३

दिशतु सखि सुखं ते पञ्चबाणः स साक्षा
दनयनपथवर्ती यस्त्वयालेखि नाथः ।
तरलितकरशाखामञ्जरीकः शरीरे
धनुषि च मकरे च स्वस्थरेखानिवेशः ॥

४५४

कस्मान्म्लायसि मालतीव मृदितेत्यालीजने पृच्छति
व्यक्तं नोदितमार्त्तयापि विरहे शालीनया बालया ।
अक्ष्णोर्बाष्पचयं निगृह्य कथमप्यालोकितः के[वलं
किं]चित्कुड्मलकोटिभिन्नशिखरश्चूतद्रुमः प्राङ्गणे ॥

*Skm II 127 (वाङ्कूटस्य or वाङ्कुटस्य)

वाङ्कूटस्य ॥

४५५

उच्छूनारुणमश्रुनिर्गमवशाच्चक्षुर्गतं मन्थरं
सोष्मश्वासकदर्थिताधररुचिर्व्यस्तालका भ्रू (fol 63b) . .
आपाण्डुः करपल्लवे च निभृतं शेते कपोलस्थली
मुग्धे कस्य तपःफलं परिणतं यस्मै तवेयं दशा ॥

यशोवर्मणः ॥

---

४५३ [1] Corrected from रु [2] MS ञ्च [3] The aksaras रे, खा, and वे are partly lost

४५४ [1] MS °त्म्ला [2] Skm बाष्पभर [3] Three aksaras lost [4] Corrected from खि

४५५ [1] MS °चुर्मन्था [2] Two aksaras lost, neither °कुटी nor लता seems appropriate, and °स्थली recurs in c [3] MS डु [4] Corrected from ता

४५६

केन प्राप्तो भुवनविजयः कः कृती कः कलावान्
केनाव्याजं स्मरचरणयोर्भक्तिरापादिता च ।
यं ध्यायन्ती[1] सुतनु बहलज्वालकन्दर्पवह्नि
प्रोद्यद्भस्मप्रचयर[2]चितं[3] पाण्डिमानं दधासि ॥

४५७

दग्धव्येयं नवकमलि[1]नीपल्लवोत्सङ्गशय्या
तप्ताङ्गारप्रकरवि[2]किरैः किं धुतैस्तालवृन्तैः[3] ।
तत्रैवास्तां दहति नयने चन्द्रवच्चन्दनाम्भः
सख्यास्ते ऽयं वन इव शिखी विप्रतीयो[4]ग आ[5]धिः ॥

अभिनन्दस्य ॥

४५८

For reff see below

सौधादुद्विजते त्य[ज[1]]त्युपवनं द्वेष्टि प्रभामैन्दवीं[1]
द्वाराच्च[2]स्यति चित्रकेलिसदसो वेशं[3] विषं मन्यते ।
आस्ते केवलमब्जिनीकिसलयप्रस्तारि[4]शय्यातले
संकल्पोपनतत्व[5]दाकृतिरसायत्तेन चित्तेन सा ॥

---

४५६ [1] MS न्ती [2] MS °परि [3] MS ता

४५७ [1] MS ले (*li*) [2] MS क [3] MS त्तै [4] MS °ख्यस्तोऽ्यम्व [5] Four aksaras partly lost, the last by no means clearly आ

४५८ *Viddhaś* III 2 *Bālar* v 8 **Skm* II 171 *Sarasvatīk ad* v 169 (anon) **Sabhyāl* B 4*a* (anon) Hemac p 182, Comm (anon) [1] MS omits ज and reads वी at end [2] MS द्र, Hemac °न्नस्यति [3] *Viddhaś*, *Bālar* ष [4] *Viddhaś*, *Bālar*, *Sarasvatīk*, Hemac, *Sabhyāl* र [5] *Sabhyāl* °मत्त

४५९

अन्तस्तारं तरलिततलाः[1] स्तोकमुत्पीडभाजः
पक्ष्मायेषु ग्रथितपृषतः कीर्णधाराः[2] क्रमेण ।
चित्तातङ्कं निजगरिमतः[3] सम्यगासूचयन्तो
निर्यान्त्यस्याः कुवलयदृशो बाष्पवारां प्रवाहाः ॥

Viddhaś III 24

४६०

मुक्तानङ्गः कुसुमविशिखान् पञ्च कुण्ठीकृताया[1][2]
न्मन्ये मुग्धां प्रहरति हठात्पत्त्रिणा वारुणेन ।
वारां[3] पूरः[4] कथमपरथा[5] स्फारनेत्र[6]प्रणाली
वक्त्रोद्दान्तस्त्रिबलिविपिने[7][8] शारिणीसाम्यमेति[9] ॥

राजशेखरस्वामी ॥

Viddhaś III 25
*Skm II 138

४६१

उन्मील्याक्षि स (fol 64a) खीर्न पश्यसि न चाप्युक्ता ददा
स्युत्तरं
नो वेत्सीदृशमत्र नेदृशमिमां शून्यामवस्थां गता ।
तल्पादृश्यकरङ्कपञ्जरमिदं जीवेन लिप्तं मना
ग्मुञ्चन्ती किमु कर्तुमिच्छसि कुरु प्रेमान्य†दिशागते†[2] ॥

वसुकल्पस्य ॥

---

४५९ [1] *Viddhaś* °लतर [2] *Viddhaś* also कार्ण [3] MS ड.

४६० [1] MS ग्रा [2] *Skm* चूर्णी [3] MS ना [4] MS यू [5] *Skm* °मित [6] MS नै (corrected ?) [7] *Skm* also क्त्रो [8] *Skm* ह [9] *Viddhaś*, *Skm* सार

४६१ [1] MS here erases ते [2] *Sic* or °ने ? Read °द्वेषा गति. ?

४६२

*Skm II 24 किं वातेन विलङ्घिता न न[1] महाभूतार्दिता किं न न
भ्रान्ता[2] किं न[3] न संनिपातलहरीप्रच्छादिता किं न न।
तत्किं रोदिति[4] मुह्यति श्वसिति किं[5] स्मेरं च धत्ते मुखं
दृष्टः किं कथयामर्यकारणरिपुः[6] श्रीभोज्य[7]देवो ऽनया[8] ॥

छित्तपस्य ॥

४६३

*Skm II 121 (अमरसिंहस्य)

कुचौ[1] धत्तः[2] कम्पं निपतति कपोलः करतले
निकामं निश्वासः[3] सरलमलकं[4] ताण्डवयति।
दृशः सामर्थ्यानि स्थगयति मुहुर्बाष्पसलिलं
प्रपञ्चो ऽयं किंचित्तव[5] सखि हृदिस्थं कथयति ॥

नरसिंहस्य ॥

४६४

त्यजसि न शयनीयं नेक्षसे स्वामवस्थां
विघटयसि न केशानाकुलग्रन्थिबन्धान्।
किमपि सखि कुरु त्वं देहयात्रानुरूपं
शतमिह विरहिण्यो[1] नेदृशं क्वापि दृष्टम् ॥

---

४६२ [1] MS न altered from च? [2] Skm भ्रा [3] Skm नु [4] MS दि [5] Skm मुह्यति रोदिति श्वसिति च [6] Skm also (A) °मर्ष्य [7] Sic MS, cf 419 [8] MS य

४६३ [1] MS चौ [2] MS त्त [3] Sic MS (न्नि) and Skm, see critical note 2 to 377 [4] Skm also क [5] Sic MS (for क?)

४६४ [1] MS °हरि

॥ विरहिव्रज्या ॥

४६५

गमनमलसं शून्या दृष्टिः श[रीर[1]]मसौष्ठवं
श्वसितमधिकं [किं[2]]त्वेतत्[3]स्यात्किमन्यदतो ऽथ वा[4] ।
भ्रमति[5] भुवने कन्दर्पाज्ञा विकारि च यौवनं
ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम् ॥

For refs see below

४६६

वारं वारं तिरयति[1] दृशोरुद्गमं[2] बाष्पपूर
स्तत्संकल्पोपहितजडिम स्त[म्भ[3]]मभ्येति गात्रम्[4] ।
सद्यः स्विद्यन्नयमविरतोत्कम्पलोलाङ्गुलीकः
पाणिर्लेखाविधिषु नितरां वर्तते किं करोमि ॥

Mālatīm I
Sarasvatīk II 157 (anon
At p 58
(anon)
**Rasavilāsa*
§ 16 (anon

४६७

उन्मी (fol 64b) लन्मुकुलकरालकुन्दकोष[1]
प्रश्चोतद्घनमकरन्दगन्धगर्भः[2] ।
तामीषत्प्रचलविलोचनां[3] नताङ्गी
मालिङ्गन् पवन मम स्पृशाङ्गमङ्गम् ॥

Mālatīm I

---

४६५ *Mālatīm* I 16 *Daśar ad* II 47 (*Mālatīm*) *Sāhityad* p 167 (*Mālatīm*) **Sml P* 64b (भवभूतेः) **Sml B* 70b (भवभूतेः) [1] Two aksaras lost [2] Aksara omitted [3] *Sāhityad* न्वे, *Mālatīm* also न्वे, *Sml P* ह्ये [4] *Sml P* °न्यथा [5] *Sml P* भव

४६६ [1] These eight aksaras are partly lost in the MS [2] *At* सुधावुद्गतो, so *Rasavilāsa* [3] Aksara omitted [4] MS त्रा

४६७ [1] *Mālatīm* प्र [2] *Mālatīm* °बन्धः [3] MS °गीषप्रे [4] *Mālatīm* also °ज्वलित

४६८

For ref see below

दलति हृदयं[1] गाढोद्वेगं[2] द्विधा न तु[3] भिद्यते[4]
वहति विकलः कायो मोहं[5] न मुञ्चति चेतनाम् ।
ज्वलयति[6] तनूमन्तर्दाहः करोति न भस्मसा
त्प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥

४६९

*Slm ıv 217 (केशटस्य)

नादत्से हरिताङ्कुरान् क्वचिदपि स्थैर्यं[1] न यन्नाहसे
यत्पर्याकुललोचनो ऽसि करुणं कूजन्दिशः[2] पश्यसि ।
दैवेनान्तरितप्रियो ऽसि हरिण त्वं चापि किं यच्चिरं[3]
प्रत्यद्रि प्रतिकन्दरं[4] प्रतिनदि प्रत्यूषरं भ्रा[5]म्य[6][सि[7]] ॥

४७०

Balar v 51

कस्त्रा[1]घातैः सुरभिरभितः सत्वरं ताडनीयो
गाढाम्रे[2]डं[3] मलयमरुतः शृङ्खलादाम दत्त ।
कारागारे क्षिपत तरसा पञ्चमं रागराजं
चन्द्रं[4] चूर्णीकुरुत[5] च शिलापट्टके पिष्टपेषम्[6] ॥

---

४६८ *Mālatīm* ix 11 *Uttararāmac* iii 31 **Sml P* 67b **Sml B* 75b *Sāhityad* p 159 (*Mālatīm*) *Sarasvatīk ad* v 169 (anon) **Padyāv* 321 (भूपतेः, margin भवभूतेः) **S-Hārāv* C 458 [1] MS य [2] *Uttarar* गो, *S-Hārāv* गं, *Sml P* °त्काण्ठ [3] *Uttarar* (one ed) शोकाद्वेगाद्द्विधा तु न, *Padyāv* कामः काम द्विधा न तु, *S-Hārāv* also has तु न [4] *Mālatīm* also भज्य [5] *Padyāv* मूर्छा [6] MS here inserts च, *Sarasvatīk* has ज्वलति च [7] *Sml P* स

४६९ [1] MS र्य [2] MS कूजन्नटि [3] *Skm* चामो ऽसि यत्प्रत्यह [4] *Skm* °कानन [5] MS भा [6] *Skm* धाव [7] Aksara lost

४७० [1] For °स्त्रा in sense of °शा? MS स्रा? *Bālar* स्मा [2] MS डा [3] *Bālar* °क्रान्तं [4] MS न्द्र [5] MS त्र [6] MS सं, *Bālar* °बिम्ब

४७१

ह्रिया संसक्ताङ्गं तदनु मदनाज्ञाप्रशिथिलं
सनाथं माञ्जिष्ठप्रसरकृशरेखैर्नखपदैः ।
घनोरुप्राग्भारं निधिमुखमिवामुद्रितमहो
कदा नु द्रक्ष्यामो विगलितदुकूलं मृगदृशः ॥

चिंतीशस्य[1] ॥

४७२

एते चूतमहीरुहो ऽप्यविरलैर्धूमायिताः षट्पदै *Skm II 494
रेते ऽपि[1] ज्वलिताः स्फुटत्किसलयोद्भेदैरशोकद्रुमाः ।
एते किंशुकशाखिनो ऽपि मलिनैरङ्गारिताः कुड्मलैः
कष्टं विश्रमयामि कुत्र नयने सर्वत्र वामो विधिः ॥

वाक्कूटस्य ॥

४७३

सव्याधेः[1] कृशता क्षतस्य रुधिरं दष्टस्य लालास्रवः[2] For refs see below
सर्वं नैतदि[हास्ति तत्कथमयं[4] पान्थस्तपस्वी मृतः ।
आ ज्ञातं मधुलम्पटैर्मधुकरैरारब्धकोलाहले
नूनं साहसिकेन चूतमुकुले दृष्टिः समारोपिता ॥

---

४७१ [1] MS ची

४७२ [1] *Skm* प्र

४७३ **Skm* II 430 (राजशेखरस्य) *Śp* 3822 (रामिलसोमिलयोः) **Sml B* 113*b* (रामिलसोमिलयोः) **Sabhyāl* 27*b* (रामिलसोमिलयो) **S-Samcaya*, xx 4 (anon) [1] MS धै. [2] *Skm* also °स्रवः, *Śp* °स्रुतिः, *Subhās* °श्रुतिः [3] These five aksaras partly obliterated in MS, the rest lost with fols 65-6 I give as far as 475*a* the readings of *Skm* *Śp* and *Sabhyāl* read किंचिन्नै°, *S-Samcaya* नैतत्किंचि°, continuing unmetrically °दिहास्ति को ऽप्ययं पान्था वराको [4] *Śp*, *Sabhyāl* सौ

४७४

Fo
beh

*Sim II 460
(कस्यचित्)

स्खलल्लीलालापं विनिपतितकर्णोत्प] (fol 67a) लदलं
श्रमस्वेदक्लिन्नं सुरतविरतिक्षामनयनम्।
कचाकर्षक्रीडासरलकुरलश्रेणिसुभगं
कदा तद्द्रष्टव्यं वदनमवदातं मृगदृशः ॥

४७५

*Sh
(वे

Sbh 1701
(कस्यापि)

अहमिव शून्यमरण्यं वयमिव तनुतां गतानि तोयानि।
अस्माकमिवोच्छ्वासा दिवसा दीर्घाश्च तप्ताश्च ॥

४७६

Fo off see
below

लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च
प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव च।
Bālc
सा नश्चेतसि कीलितेव [वि]शिखैश्चेतोभुवः पञ्चभि
श्चिन्तासंततितन्तुजालनिविडस्यूतेव लग्ना प्रिया ॥

४७७

नेत्रेन्दीवरिणी मुखाम्बुरुहिणी भ्रूवल्लिकल्लोलिनी
बाहुद्वन्द्वमृणालिनी यदि वधूर्वापी पुनः सा भवेत्।
तल्लावण्यजलावगाहनजडैरङ्गैरनङ्गानल
ज्वालाजालमुचस्त्यजेयमसमाः प्राणच्छिदो वेदनाः ॥

---

४७४ [1] MS स्त्रा [2] MS °यन [3] MS ता or डा? [4] MS दृ

४७५ [1] MS मे (mi) [2] Four aksaras partly lost [3] Sbh सलिलानि

४७६ Mālatīm v 10 Daśar ad iv 19 (Mālatīm) Saras vatīk ad ii 104 (anon), ad iv 51 (anon) At p 58 (anon) *S-Hārāv C 324 (anon) [1] S-Hārāv वा [2] Daśar S.-Hārāv °सार. [3] Aksara omitted [4] MS सन्त (corrected from न्ति)ते (ti)

४७७ [1] MS वीा [2] MS द्व. [3] MS प्रलः [4] MS वै (?)

४७८

प्रहर्ता क्वानङ्गः स च कुसुमधन्वाल्पविशिख
श्चलं सूक्ष्मं लक्ष्यं व्यवहितममूर्तं क्व च मनः।
इतीमामुद्भूतां स्फुटमनुपपत्तिं मनसि मे
रुजामाविर्भावादनुभवविरोधः शमयति ॥

*Shm II 1 (मृगराजस्य

वन्द्यतथागतस्य ॥

४७९

अन्तर्निबद्धगुरुमन्युपरंपराभि
रिच्छोचितं किमपि वक्तुमशक्नुवत्याः।
अव्यक्तहूंकृतिचलत्कुचमण्डलाया
स्तस्याः स्मरामि मुहु . . विलोकितानि ॥

४८०

अस्यद्विवक्षितमसंफलदक्षरार्थ
मुत्कम्पमानदशनच्छदमुच्छ्वसत्या।
अद्य स्मरामि परिमृज्य पटाञ्चलेन
नेत्रे तया किमपि यत्पुनरुक्तमुक्तम् ॥

*Shm II 4 (सोन्नोकस्य

(fol 67b) सोन्नोकस्य ॥

---

४७८ [1] These four aksaras partly lost [2] *Shm* ०चापो, MS ०वन्वा ऽ [3] MS च्क्ष [4] *Shm* also (A) क [5] MS सु [6] *Shm* also (B) बो

४७९ [1] MS न्य [2] MS न्न [3] MS कि, the two lost aksaras may have been रर्धं

४८० [1] *Shm* श्च [2] *Shm* ०पस्खलद् and (A var lect) ०सबद्ध, read ०सवलद्? [3] *Shm* ०न्त्या and (margin, first hand) यो [4] *Shm* ज्ञ [5] One aksara partly lost in MS

४८१

दग्धप्ररूढमदनद्रुममञ्जरीति
लावण्यपङ्कपटलोद्गतपद्मिनीति[1]।
शीतांशुबिम्बगलितामृतनिर्मितेति
बालाक्षवालहरिणाङ्कमुखीं स्मरामि ॥

४८२

मधूद्गारस्मेरभ्रमरभरहूंकारमुखरं
शरं साक्षान्मीनध्वजविजयचापच्युतमिव ।
निलीयान्योन्यस्मिन्नुपरि सहकाराङ्कुरममी
समीक्षन्ते पक्ष्मान्तरतरलतारा विरहिणः ॥

४८३

सा न चेन्मृगशावाक्षी किमन्यासां कथाव्ययः[1]।
कला न यदि शीतांशोरम्बरे कति तारकाः ॥

४८४

For refs see below

उपरि घनं घनपटलं दूरे कान्ता तदेतदापतितम्[1]।
हिमवति दिव्यौषधयः क्रोधाविष्टः फणी शिरसि[4]॥

---

४८१ [1] MS ते (*ti*) [2] MS ले (*li*) [3] *Sic* MS (for क्ष? *see* Exegetical Notes)

४८३ [1] MS पः

४८४ Bhartrhari, I 43 *Sbhr* 1744 (भर्तृहरेः) **Sml B* 121*a* (भर्तृहरेः) *Śp* 3886 (कस्यापि) *Sarasvatīk ad* III 31 (anon) Hemac p 252 (anon) **S-Ratnak* III 322–3 (anon) **S-Mukt* VI 67 (anon) [1] Hemac दयिता°, *Sarasvatīk* दयिता किमे, the other texts have तिर्यग्गिरयोऽपि नर्तितमयूराः and दूरे कान्ता (*Śp* बाला, *S-Ratnak* वनिता), etc, as the second pāda of a verse beginning उपरि पयोधरमाला [2] MS व्यो [3] *Śp*, *Sarasvatīk*, *S-Ratnak*, Hemac कोपा [4] *Sbhr*, *Śp*, *S-Ratnak*, *S-Mukt*, Bhartrhari read this line क्षितिरपि (or वसुधा) कन्दलधवला दृ(or त)ष्टिं पथिकः क्व पातयतु

४८५

स्थगितं नवाम्बुवाहैरुत्तानास्यो विलोकयन् व्योम ।
संक्रमयतीव पथिकस्तज्जलनिवहं स्वलोचनयोः ॥

जयीकस्य[1] ॥

४८६

ते जङ्घे जघनं च तत्तदुदरं तौ च स्तनौ तत्स्मितं
सूक्तिः सा च तदीक्षणोत्पलयुगं धम्मिल्लभारः स च ।
लावण्यामृतबिन्दुवर्षि वदनं तच्चैवमेणीदृश
स्तस्यास्तद्वयमेकमेवमसकृद्ध्यायन्त एवास्महे ॥

नरसिंहस्य ॥

४८७

यदि शशधरस्त्वद्वक्त्रेण प्रसह्य तिरस्कृत
स्तदयमदयो मह्यं मुग्धे किमेवमसूयति ।
यदमृतरसासारस्रुद्भिर्धिनोत्यखिलं जग
ज्ज्वलयति तु मामेभिर्वह्निच्छटाकटुभिः करैः ॥

परमेश्वरस्य ॥

४८८

लीलाताण्डवितभ्रुवः स्मितसुधाप्रस्यन्दभाजो दल
[न्नीलाब्जद्युतिं] (fol 68a) निर्भरा दरवलत्पक्ष्मावलीचारवः ।
प्राप्तास्तस्य वियोगिनः स्मृतिपथं खेदं समातन्वते
प्रेमार्द्राः सुदृशो विकुञ्चनततिप्रेङ्खत्कटाक्षा दृशः ॥

४८५ [1] Two aksaras partly lost and uncertain

४८७ [1] MS ह्नि (hni)

४८८ [1] So begins *Damayantīkathā*, VII 41 [2] Five aksaras partly or wholly lost [3] MS °राद्दरवलयेच्चा [4] MS य

४८९

विस्फारायास्तरलतं[1] . . . . विस्फुरन्त
स्तासां तासां नयनमसकृन्नैपुणाद्वञ्चयित्वा ।
मुक्तास्तन्व्या मसृणपरुषा[स्ते[2]]कटाक्षक्षुरप्रा
श्छिन्नं छिन्नं हृदयमदयैश्छिद्यते ऽद्यापि . .[3] ॥

[पर[4]]मेश्वरस्य ॥

४९०

For ref see below

श्यामां[1] श्यामलिमानमानयत भोः सान्द्रैर्मसीकूर्चकै
स्तन्त्रं[2] मन्त्रमथ[3] प्रयुज्य हरत श्वेतोत्पलानां स्मितम्[4] ।
चन्द्रं चूर्णयत क्षणाच्च[5] कणशः [कृत्वा शिला[6]]पट्टके
येन द्रष्टुमहं क्षमे[7] दश दिशस्तद्वक्त्रमुद्राङ्किताः ॥

४९१

Viddhaś II 1

तस्मिन्[1] पञ्चशरे स्मरे भगवता भर्गेण[2] भस्मीकृते
जानाम्यक्षय[साय[3]]कं कमलभूः कामान्तरं नि[र्ममे[4]।]
यस्यामीभिरितस्ततश्च विशिखैरापुङ्खमग्नात्मभि
र्जातं मे विदलत्कदम्बमुकुलस्पर्शोपमानं[5] मनः ॥

---

४८९ [1] त uncertain, the following five aksaras (रश्मिरशुभि or ॰रश्मिभि ?) are lost [2] Doubtful restoration of one aksara omitted in MS [3] Two aksaras lost (चैर्मे or चैर्नः ?) [4] Two aksaras lost

४९० *Viddhaś* III 1 **Sml P* 67b (राजशेखरस्य) **S-Hārāv* C 452 (कस्यापि) Hemac p 193 (anon) *Kāvyapr ad ad* VII 9 (anon) [1] *Viddhaś* (some MSS), *Sml P*, *S-Hārāv* ज्योत्स्नां (॰त्स्नीं) [2] MS र्वे [3] *Viddhaś* (some MSS), *Sml P*, *S-Hārāv* Hemac मन्त्र तन्त्र [4] *S-Hārāv*, *Kāvyapr ad* श्रिय [5] *Sml P* ॰णेन [6] Four aksaras lost in MS, the first having probably been क. [7] Hemac मो

४९१ [1] MS स्मे (*smi*) [2] MS पे [3] Two aksaras omitted [4] Two aksaras lost [5] MS य

४९२

सूतिर्दुग्धसमुद्रतो भगवतः श्रीकौस्तुभे सो[दरौ[1]] | *Viddhaś* III 13
सौहार्दे कुमुदाकरे चँ किरणाः पीयूषधाराकिरः । | *Slm II 505
स्पर्धा ते वदनाम्बुजैर्मृगदृशां तत्स्थाणुचूडामणे | (कस्यचित्)
हंहो चन्द्र कथं निषिञ्चसि मयि ज्वालामुचो [वेदना]ः॥ | *Sabhyāl B 2a (राजशेखरस्य)

४९३

अपि पिबत चकोराः कृत्स्नमुन्नामिकण्ठ[1] | *Viddhaś* III 15
क्रमसरलितचञ्चञ्चवश्चन्द्रिकाम्भः[3] । | *Bālar* X 75
विरहविधुरितानां जीवितत्राणहेतो[5]
र्भवति हरिणलक्ष्मा येन तेजोद[रिद्रः[6]] ॥

४९४

(f 68b) [श्री]तांशुर्विषसोदरः फणभृतां लीलास्पदं चन्दनं | *Viddhaś* III 19
हाराः क्षारपयोभुवः प्रियसुहृत्पङ्केरुहं भास्वतः ।
इत्येषां किमिवास्तु हन्त मदनज्योतिर्विघाताय य[5]
द्बाह्याकारपरिभ्रमेण तु वयं तत्त्वत्य[जो व[6]]ञ्चिताः ॥

---

४९२ [1] Two akṣaras lost [2] *Viddhaś*, *Slm*, *Sabhyāl* सु [3] *Viddhaś*, *Sabhyāl* नु सि, *Slm* नु सु [4] So *Slm*, *Viddhaś*, *Sabhyāl* रोचिषः, in the MS a part of वे seems to be traceable

४९३ [1] *Viddhaś* क्षत्समुन्नाम्य कण्ठं or नित्यमुन्नाम° [2] *Viddhaś*, *Bālar* °कवलन [3] *Bālar* °चन्द्रकान्तीरमिश्राः [4] MS वे (ii) [5] These two akṣaras, as well as the following र्भ, are partly lost in the MS [6] Two akṣaras lost

४९४ [1] One akṣara wholly, and one partly lost [2] MS °र्वेषत्सा [3] *Viddhaś* also मु [4] *Viddhaś* °वस्तु, MS हन्तु [5] Five akṣaras partly lost [6] Two akṣaras lost

४९५

Viddhas III 20

व्यजनमरुतः श्वासश्रेणीमिमामुपचिन्वते
मलयजरसो धाराबाष्पं प्रपञ्चयितुं प्रभुः ।
कुसुमशयनं कामास्त्राणां करोति सहायतां
द्विगुणगरिमा . . न्मा[1]थः कथं नु विरंस्यति ॥

राजशेखरस्यैते ॥

४९६

Sbhv 1087 (बाणकवेः) Amaru, 131 Aucityav ad 14 (भट्टबाणस्य)

हारो जलार्द्र[1]शयनं नलिनीदलानि
प्रालेयशीकरमुचस्तुहिना[2]द्रिवाताः[3] ।
यस्येन्धनानि सरसान्यपि[4] चन्दनानि[5]
[निर्वा][6]णमेष्यति कथं स मनोभवाग्निः ॥

४९७

Viddhas II 3

मन्दादरः कुसुमपत्त्रि[1]षु पेलवेषु
नूनं बिभर्ति मदनः पवनास्त्रमद्य ।
हारप्रकाण्डशरलाः कथमन्यथामी[2]
श्वासाः[प्रनर्तित[3]]दुकूलदशाः सरन्ति ॥

— — — — — —

४९५ [1] *Viddhas* कामोन्मा, MS मा ऽ. न्मा (for मानङ्गोन्मा?

४९६ [1] *Sbhv*, Amaru, *Aucityav* वस [2] MS णा [3] *Sbhv* °स्र हिमांशुभासः, Amaru, *Aucityav* °स्तुहिनांशुभास [4] *Sbhv*, Amaru, *Aucityav* °सानि च [5] This aksara is partly lost in MS [6] These two aksaras are lost in MS

४९७ [1] MS °यन्त्रि [2] MS मा [3] Four aksaras lost

४९८

अकृतप्रेमैव[1] वरं न पुनः संजातविघटितप्रेमा[2] ।
उद्धृतनयनस्ताम्यति यथा हि न तथेह[3] जातान्धः[4] ॥

For reff see below

४९९

स्वप्न प्रसीद[1] भगवन् पुन[रेकवारं
सं[1]]दर्शय प्रियतमां क्षणमात्रमेव ।
दृष्टा[2] सती निविडबाहुनिबन्ध[3]लग्नं
तत्रैव मां नयति सा[4] यदि वा न याति ॥

*Skm ii 473 (कालिदासस्य)

---

४९८ *Sbhr* 1389 (रविगुप्तस्य) *Bhojapr* 136 (Pavie, p 38, anon) [1] MS here inserts च [2] *Sbhr* विघ्नित [3] *Sbhr* °न्तो हि यथा ताम्यत्येव न [4] For this verse *Bhojapr* has (1) (Pavie)

अकृतस्नेहो हि वर न वर स जात(*sic*)विघट्टितस्नेह. ।
उद्धृतनयनस्ताम्यति यथा न तथा(*sic*) जात्यन्ध. ॥

(2) (Bomb 1886, Calc 1883)

स्नेहो हि वरमघटितो न वर सजातविघटित· स्नेहः ।
हृतनयनो हि विषादी न विषादी भवति जात्यन्धः ॥

४९९ [1] MS षी , the five akṣaras रे . . . स[न्दर्श] are lost [2] *Skm* also (B) दृष्टा [3] *Skm* omits निबन्ध [4] *Skm* A omits सा

॥ असतीव्रज्या ॥

५००

For reff see below

दृष्टिं हे प्रतिवे[शिनि क्षण[1]]मिहाप्यस्मद्गृहे दास्यसि
प्रायो नैवं[2] शिशोः पिताद्य विरसाः[3] कौपीरपः पास्यति[4] ।
एकाकिन्यपि यामि तद्वरमितः[5] स्रोतस्तमालाकुलं[7]
